जयवल्लभं नाम वज्जालग्गं

संस्कृतच्छायासंवलितम् ।

सव्वन्नुवयणपङ्कय-निवासिणिं पणमिऊण सुयदेविं ।
धम्माइतिवग्गजुयं सुयणाण सुहासियं वोच्छं ॥ १ ॥
अमयं पाइयकव्वं पढिउं सोउं च जे न-याणन्ति ।
कामस्स तत्ततत्तिं कुणन्ति ते कह न लज्जन्ति ॥ २ ॥
विविहकइविरइयाणं गाहाणं वरकुलाणि घेत्तूण ।
रइयं वज्जालग्गं विहिणा जयवल्लहं नाम ॥ ३ ॥
एक्कत्थे पत्थावे जत्थ पढिज्जन्ति पउरगाहाओ ।
तं खलु वज्जालग्गं वज्ज त्ति य पद्धई भणिया ॥ ४ ॥
एयं वज्जालग्गं सव्वं जो पढइ अवसरम्मि सया ।
पाइयकव्वकई सो होहिइ तह कित्तिमन्तो य ॥ ५ ॥

सोयारवज्जा ।

दुक्खं कीरइ कव्वं कव्वम्मि कए पउञ्जणा दुक्खं ।
सन्ते पउञ्जमाणे सोयारा दुल्लहा होन्ति ॥ ६ ॥
सक्कयसक्कयं पि फुड अत्थो सोयारसङ्गमवसेण ।
अप्पुव्वरसविसेसं जणेइ जं तं महच्छरियं ॥ ७ ॥
मुत्ताहलं व कव्वं सहावविमलं सुवन्नसंघडियं ।
सोयारकण्णकुहरम्मि पयडियं पायडं होइ ॥ ८ ॥

गाहावज्जा ।

अद्धक्खरभणियाइं नूणं सविलाससुद्धहसियाइं ।
अद्धच्छिपेच्छियाइं गाहाहि विणा न नज्जन्ति ॥ ९ ॥

सर्वज्ञवदनपङ्कजनिवासिनीं प्रणम्य श्रुतदेवीं ।
धर्मादित्रिवर्गयुतं सुजनानां सुभाषितं वक्ष्यामि ॥ १ ॥
अमृतं प्राकृतकाव्यं पठितुं श्रोतुं च न जानन्ति ।
कामस्य तत्त्ववार्त्तां कुर्वन्ति ते कथं न लज्जन्ति ॥ २ ॥
विविधकविविरचितानां गाथानां वरकुलानि गृहीत्वा ।
रचितं वज्जालग्गं विधिना जयवल्लभं नाम ॥ ३ ॥
एकार्थे प्रस्तावे यत्र पठ्यन्ते प्रचुरगाथाः ।
तत्खलु वज्जालग्गं वज्जेति च पद्धतिर्भणिता ॥ ४ ॥
इदं वज्जालग्गं सर्वं यः पठत्यवसरे सदा ।
प्राकृतकाव्यकविः स भविष्यति तथा कीर्तिमांश्च ॥ ५ ॥

श्रोतृपद्धतिः ।

दुःखं क्रियते काव्यं काव्ये कृते प्रयुञ्जानो दुःखं ।
सति प्रयुञ्जाने श्रोतारो दुर्लभा भवन्ति ॥ ६ ॥
संस्कृतमसंस्कृतमपि खल्वर्थः श्रोतृसङ्गमवशेन ।
अपूर्वरसविशेषं जनयति यत्तन्महाश्चर्यं ॥ ७ ॥
मुक्ताफलमिव काव्यं स्वभावविमलं सुवर्णसंघटितं ।
श्रोतृकर्णकुहरे प्रकटितं प्रकटं भवति ॥ ८ ॥

गाथापद्धतिः ।

अर्धाक्षरभणितानि नूनं सविलासमुग्धहसितानि ।
अर्धाक्षिप्रेक्षितानि गाथाभिर्विना न ज्ञायन्ते ॥ ९ ॥

सालङ्काराहि सलक्खणाहि अन्नन्नरायरसियाहिं ।
गाहाहि पणइणीहि य खिज्जइ चित्तं अइन्तीहिं ॥ १० ॥

एयं चिय नवरि फुडं हिययं गाहाण महिलियाणं च ।
अणरसिएहि न लब्भइ दविणं व विहीणपुरीसेहिं ॥ ११ ॥

सच्छन्दिया सहवा सालङ्कारा य सरसउल्लावा ।
वरकामिणि व्व गाहा गाहिज्जन्ती रसं देइ ॥ १२ ॥

गाहाण रसा महिलाण विब्भमा कइयणाण उल्लावा ।
कस्स न हरन्ति हिययं बालाण य मम्मणुल्लावा ॥ १३ ॥

सव्वो गाहाउ जणो लीसत्थो भणइ सव्वगोट्ठीसु ।
परमत्थो जो ताणं सो नाओ सइकइलेहिं ॥ १४ ॥

गाहा रुवइ वराई सिक्खिज्जन्ती गवारलोएहिं ।
कीरइ लुञ्चपलुञ्चा जह गाई मन्ददोहेहिं ॥ १५ ॥

गाहे भज्जिहिसि तुमं अहवा लहुयत्तणं पि पाविहिसि ।
गामारदन्तदिढकढिणपीडिया उच्छुजट्ठि व्व ॥ १६ ॥

गाहाणं गीयाणं तन्तीसद्दाण पोढमहिलाणं ।
ताणं चिय सो दण्डो जे ताण रसं न-याणन्ति ॥ १७ ॥

छन्दं अयाणमाणेहि जा किया सा न होइ रमणिज्जा ।
किं गाहा अह सेवा अहवा गाहा वि सेवा वि ॥ १८ ॥

कव्ववज्जा ।

चिन्तामन्दरमन्थाणमन्थिए वित्थरम्मि अत्थाहे ।
उप्पज्जन्ति कईहिययसायरे कव्वरयणाइं ॥ १९ ॥

सालङ्काराभिः सलक्षणाभिरन्योन्यरागरमिताभिः ।
गाथाभिः प्रणयिनीभिश्च खिद्यते चित्तमनागच्छन्तीभिः ॥ १० ॥
एतदेव केवलं स्फुटं हृदयं गाथानां महिलानां च ।
अरसिकैर्न लभ्यते द्रविणमिव विहीनपुण्यैः ॥ ११ ॥
सच्छन्दिता सरूपा सालङ्कारा च सरसोल्लापा ।
वरकामिनीव गाथा पठ्यमानानुभूयमाना च रसं ददाति ॥ १२ ॥
गाथानां रसा महिलानां विभ्रमा कविजनानामुल्लापाः ।
कस्य न हरन्ति हृदयं बालानां च मन्मनोल्लापाः ॥ १३ ॥
सर्वो गाथा जनो विश्वस्तो भणति सर्वगोष्ठीषु ।
परमार्थो यस्तासां स ज्ञातो महाविदग्धैः ॥ १४ ॥
गाथा रोदिति वराकी शिक्ष्यमाणा गौणलोकैः ।
क्रियते लुञ्चप्रलुञ्चा यथा गोर्मन्ददोग्धृभिः ॥ १५ ॥
गाथे भङ्क्ष्यसे त्वमथवा लघुत्वमपि प्राप्स्यसि ।
ग्रामीणदन्तदृढकठिनपीडिता इक्षुयष्टिरिव ॥ १६ ॥
गाथानां गीतानां तन्त्रीशब्दानां प्रौढमहिलानां ।
तेषामेव स दण्डो ये तेषां रसं न जानन्ति ॥ १७ ॥
छन्दोऽजानद्भिर्या कृता सा न भवति रमणीया ।
किं गाथाथ सेवाथवा गाथापि सेवापि ॥ १८ ॥

काव्यपद्धतिः ।

चिन्तामन्दरमन्थानमथिते विस्तरेऽस्ताघे ।
उत्पद्यन्ते कविहृदयसागरे काव्यरत्नानि ॥ १९ ॥

रयणुज्जलपयसोहं तं कव्वं जं तवेइ पडिवक्खं ।
पुरिसायन्तविलासिणि— रसणादामं मिव रसन्तं ॥ २० ॥

पाइयकव्वम्मि रसो जो जायइ तह व छेयभणिएहिं ।
उययस्स य वासियसीयलस्स तित्तिं न वच्चामो ॥ २१ ॥

कहकहवि रएइ पयं मग्गं पुलएइ छेयमारुहइ ।
चोरो व्व कई अत्थं घेत्तूण कहवि निव्वहइ ॥ २२ ॥

सद्दावसद्दभीरू पए पए किंपि किंपि चिन्तन्तो ।
दुक्खेहि कहवि पावइ चोरो अत्थं कई कव्वं ॥ २३ ॥

सद्दपलोट्टं दोसेहि वज्जियं सुललियं फुडं मऊरं ।
पुलेहि कहवि पावइ छन्दे कव्वं कलत्तं च ॥ २४ ॥

अणवरयबहलरोमञ्चकञ्चुयं जणियजणमणाणन्दं ।
जं न धुणावइ सीसं कव्वं पेम्मं च किं तेण ॥ २५ ॥

सो सोहइ दूसन्तो कइयणरइयाइ विविहकव्वाइं ।
जो भञ्जिऊण कुवयं अन्नपयं सुन्दरं देइ ॥ २६ ॥

अत्थक्को रसरहिओ देसविहूणो णुणासिओ तुरिओ ।
मुहवञ्चणो विराओ एए दोसा पढन्तस्स ॥ २७ ॥

देसियसद्दपलोट्टं मऊरक्खरछन्दसंठियं ललियं ।
फुडवियडपायडत्थं पाइयकव्वं पढेयव्वं ॥ २८ ॥

ललिए मऊरक्खरए जुवईयणवल्लहे ससिङ्गारे ।
सन्ते पाइयकव्वे को सक्कइ सक्कयं पढिउं ॥ २९ ॥

अबुहा बुहाण मज्झे पढन्ति जे छन्दलक्खणविहूणा ।
ते भमुहाखग्गनिवाडियं पि सीसं न लक्खन्ति ॥ ३० ॥

रत्नोज्ज्वलपदशोभं तत्काव्यं यत्तापयति प्रतिपक्षं ।
पुरुषायमानविलासिनीरशनादामेव रसन्तं ॥ २० ॥
प्राकृतकाव्ये रसो यो जायते तथा वा छेकभणितैः ।
उदकस्य च वासितशीतलस्य तृप्तिं न व्रजामः ॥ २१ ॥
कथंकथमपि रचयति पदं मार्गं प्रलोकयति (च्छेकं) छेदमारोहति
चोर इव कविरर्थं गृहीत्वा कथमपि निर्वहति ॥ २२ ॥
शब्दापशब्दभीरुः पदे पदे किमपि किमपि चिन्तयन् ।
दुःखैः कथमपि प्राप्नोति चोरोऽर्थं कविः काव्यं ॥ २३ ॥
शब्दपर्यस्तं दोषैर्वर्जितं सुललितं स्फुटं मधुरं ।
पुण्यैः कथमपि प्राप्नोति छन्दसि काव्यं कलत्रं च ॥ २४ ॥
अनवरतबहुलरोमाञ्चकञ्चुकं जनितजनमनआनन्दं ।
यन्न धूनयते शीर्षं काव्यं प्रेम च किं तेन ॥ २५ ॥
स शोभते दूषयन् कविजनरचितानि विविधकाव्यानि ।
यो भङ्क्त्वा कुपदमन्यत्पदं सुन्दरं ददाति ॥ २६ ॥
अच्छिन्नो रसरहितो देशविहीनोऽनुनासिकस्वरितः ।
मुखावष्टब्धो विराग एते दोषाः पठतः ॥ २७ ॥
देशीशब्दपर्यस्तं मधुराक्षरच्छन्दःसंस्थितं ललितं ।
स्फुटविकटप्रकटार्थं प्राकृतकाव्यं पठनीयं ॥ २८ ॥
ललिते मधुराक्षरे युवतिजनवल्लभे सशृङ्गारे ।
सति प्राकृतकाव्ये कः शक्नोति संस्कृतं पठितुं ॥ २९ ॥
अबुधा बुधानां मध्ये पठन्ति ये छन्दोलक्षणविहीनाः ।
ते भ्रूखड्गनिपातितमपि शीर्षं न लक्षयन्ति ॥ ३० ॥

पाइयकव्वस्स नमो पाइयकव्वं च निम्मियं जेण ।
ताहं चिय पणमामो पढिऊण य जे वियाणन्ति ॥ २१ ॥

सज्जणवज्जा ।

सहणम्मि समी सहणम्मि सुरतरू सहणसंभवा लच्छी ।
सुयणो उण कहसु सहं न-याणिमो कत्थ संभूओ ॥ २२ ॥
सुयणो सुद्धसहावो मइलिज्जन्तो वि दुज्जणयणेण ।
छारेण दप्पणो विय अहिययरं निम्मलो होइ ॥ २३ ॥
सुयणो न कुप्पइ च्चिय अह कुप्पइ मङ्गुलं न चिन्तेइ ।
अह चिन्तेइ न जम्पइ अह जम्पइ लज्जिरो होइ ॥ २४ ॥
दढरोसकलुसियस्स वि सुयणस्स मुहाउ विप्पियं कत्तो ।
राहुमुहम्मि वि ससिणो किरणा अमयं चिय मुयन्ति ॥ २५ ॥
दिट्ठा हरन्ति दुक्खं जम्पन्ता देन्ति सयलसोक्खाइं ।
एयं विहिणा सुकयं सुयणा जं निम्मिया भुवणे ॥ २६ ॥
न हसन्ति परं न थुणन्ति अप्पयं पियसयाइ जम्पन्ति ।
एसो सुयणसहावो नमो नमो ताण पुरिसाणं ॥ २७ ॥
अकए वि कए वि पिए पियं कुणन्ता जयम्मि दीसन्ति ।
कयविप्पिए वि हु पियं कुणन्ति ते दुल्लहा सुयणा ॥ २८ ॥
सव्वस्स एह पयई पियम्मि उप्पाइए पियं काउं ।
सुयणस्स एह पयई अकए वि पिए पियं काउं ॥ २९ ॥
फरुसं न भणसि भणिओ वि हससि हसिऊण जम्पसि पियाइं ।
सज्जण तुज्झ सहावो न-याणिमो कस्स सारिच्छो ॥ ४० ॥

प्राकृतकाव्याय नमः प्राकृतकाव्यं च निर्मितं येन ।
तेभ्य एव प्रणमामः पठितुं च ये विजानन्ति ॥ ३ १ ॥

सज्जनपद्धतिः ।

मथने शशी मथने सुरतरुर्मथनसम्भवा लक्ष्मीः ।
सुजनः पुनः कथय मम न जानीमः क सम्भूतः ॥ ३ २ ॥
सुजनः शुद्धस्वभावो मलिनीक्रियमाणोऽपि दुर्जनजनेन ।
क्षारेण दर्पण इवाधिकतरं निर्मलो भवति ॥ ३ ३ ॥
सुजनो न कुप्यत्येवाथ कुप्यति पापं न चिन्तयति ।
अथ चिन्तयति न जल्पत्यथ जल्पति लज्जितो भवति ॥ ३ ४ ॥
दृढरोषकलुषितस्यापि सुजनस्य मुखाद् विप्रियं कुतः ।
राहुमुखेऽपि शशिनः किरणा अमृतमेव मुञ्चन्ति ॥ ३ ५ ॥
दृष्टा हरन्ति दुःखं जल्पन्तो ददति सकलसौख्यानि ।
एतद्विधिना सुकृतं सुजना यन्निर्मिता भुवने ॥ ३ ६ ॥
न हसन्ति परं न स्तुवन्त्यात्मानं प्रियशतानि जल्पन्ति ।
एष सुजनस्वभावो नमो नमस्तेभ्यः पुरुषेभ्यः ॥ ३ ७ ॥
अकृतेऽपि कृतेऽपि प्रिये प्रियं कुर्वन्तो जगति दृश्यन्ते ।
कृतविप्रियेऽपि खलु प्रियं कुर्वन्ति ते दुर्लभाः सुजनाः ॥ ३ ८ ॥
सर्वस्यैषा प्रकृतिः प्रिय उत्पादिते प्रियं कर्तुं ।
सुजनस्यैषा प्रकृतिरकृतेऽपि प्रिये प्रियं कर्तुं ॥ ३ ९ ॥
परुषं न भणसि भणितो ऽपि हससि हसित्वा जल्पसि प्रियाणि ।
सज्जन तव स्वभावो न जानीमः कस्य सदृक्षः ॥ ४ ० ॥

नेच्छसि परयवयारं　परउवयारं च निच्चमावहसि ।
अवराहेहि न कुप्पसि　सुयण नमो तुह सुहावस्स ॥ ४१ ॥
दोहिं चिय पज्जत्तं　बहुएहि वि किं गुणेहि सुयणस्स ।
विज्जुप्फुरिओ रोसो　मित्ती पाहाणरेह व्व ॥ ४२ ॥
रे रे कलिकालमहा — गइन्दगलगज्जियस्स को कालो ।
अज्ज वि सुपुरिसकेसरि — किसोरचलणङ्किया पुहवी ॥ ४३ ॥
दीणं अब्भुद्धरिउं　पत्ते सरणागए पियं काउं ।
अवरद्धेसु वि खमिउं　सुयणो च्चिय नवरि जाणेइ ॥ ४४ ॥
बे पुरिसा धरइ धरा　अहवा दोहिं पि धारिया धरणी ।
उवयारे जस्स मई　उवयरियं जो न पम्हुसइ ॥ ४५ ॥
पडिवज्जन्ति न सुयणा　अह पडिवज्जन्ति कहवि दुक्खेहिं ।
पत्थररेह व्व समा　मरणे वि न अन्नहा होइ ॥ ४६ ॥
सेला चलन्ति पलए　मज्जायं सायरा वि मेल्लन्ति ।
सुयणा तहिं पि काले　पडिवन्नं नेय सिढिलन्ति ॥ ४७ ॥
चन्दणतरु व्व सुयणा　फलरहिया जइ वि निम्मिया विहिणा ।
तह वि कुणन्ति परत्थं　नियय सरीरेण लोयस्स ॥ ४८ ॥

दुज्जणवज्जा ।

हयदुज्जणस्स वयणं　निरन्तरं बहलकज्जलच्छायं ।
संकुद्धं भिउडिजुयं　कयावि न हु निम्मलं दिट्ठं ॥ ४९ ॥
थद्धो वङ्कग्गीवो　अवट्ठिओ विसमदिट्ठिदुप्पेच्छो ।
अहिणवरिद्धि व्व खलो　सूलाहिन्नु व्व पडिहाइ ॥ ५० ॥

नेच्छसि परापकारं परोपकारं च नित्यमावहसि।
अपराधेन कुप्यसि सुजन नमस्तव स्वभावाय॥ ४१॥
द्वाभ्यामेव पर्याप्तं बहुभिर्गुणैरपि किं सुजनस्य।
विद्युत्स्फुरितो रोषो मैत्री पाषाणरेखेव॥ ४२॥
रे रे कलिकालमहागजेन्द्रगलगर्जितस्य कः कालः।
अद्यापि सुपुरुषकेसरिकिशोरचरणाङ्किता पृथ्वी॥ ४३॥
दीनमभ्युद्धर्तुं प्राप्ते शरणागते प्रियं कर्तुं।
अपराद्धेष्वपि क्षमितुं सुजन एव केवलं जानाति॥ ४४॥
द्वौ पुरुषौ धरतु धराथवा द्वाभ्यामपि धारिता धरणी।
उपकारे यस्य मतिर्यश्चोपकृतं न विस्मरति॥ ४५॥
प्रतिपद्यन्ते न सुजना अथ प्रतिपद्यन्ते कथमपि दुःखैः।
प्रस्तररेखेव समा मरणेऽपि नान्यथा भवति॥ ४६॥
शैलाश्चलन्ति प्रलये मर्यादां सागरा अपि मुञ्चन्ति।
सुजनास्तस्मिन्नपि काले प्रतिपन्नं नैव शिथिलयन्ति॥ ४७॥
चन्दनतरुरिव सुजनाः फलरहिता यद्यपि निर्मिता विधिना।
तथापि कुर्वन्ति परार्थं निजकशरीरेण लोके॥ ४८॥

दुर्जनपद्धतिः।

हतदुर्जनस्य वदनं निरन्तरं बहलकज्जलच्छायं।
संकुद्धं भ्रुकुटियुतं कदापि न खलु निर्मलं दृष्टं॥ ४९॥
स्तब्धो वक्रग्रीवोऽवाञ्छितो विषमदृष्टिदुःप्रेक्ष्यः।
अभिनवर्द्धिरिव खलः शूलाभिन्न इव प्रतिभाति॥ ५०॥

मइमासभेयजणणो दुम्मुहओ अत्थिखण्डणसमत्थो ।
तह वि हु मज्झावलिओ नमइ खलो नहरणसरिच्छो ॥ ५१ ॥
अकुलीणो दोमुहओ ता मङ्गरो भोयणं मुहे जाव ।
मुरउ व्व खलो जिणम्मि भोयणे विरसमारसइ ॥ ५२ ॥
निद्धम्मो गुणरहिओ ठाणविमुक्को य लोहसंभूओ ।
विन्धइ जणस्स हिययं पिसुणो बाणु व्व लग्गन्तो ॥ ५३ ॥
जम्मे वि जं न हूयं न हु होसइ जं च जम्मलक्खे वि ।
तं जम्पन्ति तह च्चिय पिसुणा जह होइ सारिच्छं ॥ ५४ ॥
गुणिणो गुणेहि विहवेहि विहविणो होन्तु गव्विया नाम ।
दोसेहि नवरि गव्वो खलाण मग्गो च्चिय अउव्वो ॥ ५५ ॥
मन्तं न देन्ति वारन्ति देन्तयं दिन्नयं पि हारन्ति ।
अणिमित्तवइरियाणं खलाण मग्गो च्चिय अउव्वो ॥ ५६ ॥
परविवरलद्धलक्खे चित्तलिए भीसणे जमलजीहे ।
वङ्कपरिसक्किरे गोणसे व्व पिसुणे सुहं कत्तो ॥ ५७ ॥
असमत्थमन्ततन्ताण कुलविमुक्काण भोयहीणाणं ।
दिट्ठाण को न बीहइ विन्तरसप्पाण व खलाणं ॥ ५८ ॥
एयं चिय बहुलाहो जीविज्जइ जं खलाण मज्झम्मि ।
लाहो जं न डसिज्जइ भुयङ्गपरिवेढिए चलणे ॥ ५९ ॥
न सहइ अब्भत्थणियं असइ गयाणं पि पिट्ठिमंसाइं ।
दट्ठूण भासुरमुहं खलसीहं को न बीहेइ ॥ ६० ॥
मा वच्चह वीसम्भं पसुहे बहुकूडकवडभरियाणं ।
निव्वत्तियकज्जपरम्मुहाण सुणयाण व खलाणं ॥ ६१ ॥

नखमांसभेदजननो दुर्मुखोऽस्थिखण्डनसमर्थः (अस्थि०)।
तथापि खलु चित्तवक्रो (मध्यावलितो) नमत खलो नखिसदृक्षः॥५१॥
अकुलीनो द्विमुखस्तावन्मधुरो भोजनं मुखे यावत्।
मुरज इव खलो जीर्णे भोजने विरसमारसति॥५२॥
निर्धर्मो गुणरहितः स्थाणविमुक्तश्च लोभसंभूतः (लोह०)।
विध्यति जनस्य हृदयं पिशुनो बाण इव लगन्॥५३॥
जन्मन्यपि यन्न भूतं न खलु भविष्यति यच्च जन्मलक्षेऽपि।
तज्जल्पन्ति तथैव पिशुना यथा भवति सदृक्षं॥५४॥
गुणिनो गुणैर्विभवैर्विभविनो भवन्तु गर्विता नाम।
दोषैर्नवरं गर्वः खलानां मार्ग एवापूर्वः॥५५॥
स्वं न ददाति वारयन्ति ददतं दत्तमपि हारयन्ति।
अनिमित्तवैरिणां खलानां मार्ग एवापूर्वः॥५६॥
परविवरलक्ष्यलक्षे नानाचित्ते (चित्रले) भीषणे यमलजिह्वे।
वक्रगमनशीले गोनस इव पिशुने सुखं कुतः॥५७॥
असमर्थमन्त्रतन्त्रेभ्यः कुलविमुक्तेभ्यो भोगहीनेभ्यः।
दुष्टेभ्यः को न बिभेति व्यन्तरसर्पेभ्य इव खलेभ्यः॥५८॥
एतदेव बहुलाभो जीव्यते यत्खलानां मध्ये।
लाभो यत्र दृश्यते भुजङ्गपरिवेष्टिते चरणे॥५९॥ [पृष्ठमांसाशि।
न सहतेऽभ्यर्थनं (अभ्रस्तनितं) अश्नाति गतानामपि (गजानामपि)
दृष्ट्वा भासुरमुखं खलसिंहं को न बिभेति॥६०॥
मा व्रजत विश्रम्भं प्रमुखे बहुकूटकपटभृतानां।
निर्वर्तितकार्यपराङ्मुखानां शकुनकानामिव खलानां॥६१॥

जेहिं चिय उब्भविया जाण पसाएण निग्गयपयावा ।
भमरा डहन्ति विञ्झं खलाण मग्गो च्चिय अउव्वो ॥ ६२ ॥
सरसा वि दुमा दावाणलेण डज्झन्ति सुक्कसंवलिया ।
दुज्जणसङ्गे पत्ते सुयणो वि सुहं न पावेइ ॥ ६३ ॥
खलसज्जणाण दोसा गुणा य को वण्णिउं तरइ लोए ।
जइ नवरि नायराओ दोहिं जीहासहस्सेहिं ॥ ६४ ॥

मित्तवज्जा ।

एक्कं चिय सलहिज्जइ दिणेसदियहाण नवरि निव्वहणं ।
आ जम्म एक्कमेक्केहि जेहि विरहो च्चिय न दिट्ठो ॥ ६५ ॥
पडिवन्नं दिणयरवासराण दोण्हं अखण्डियं सुहइ ।
सूरो न दिणेण विणा दिणो वि न हु सूरविरहम्मि ॥ ६६ ॥
मित्तं पयतोयसमं सारिच्छं जं न होइ किं तेण ।
अहियाएइ मिलन्तं आवइ आवट्टए पढमं ॥ ६७ ॥
तं मित्त कायव्वं जं किर वसणम्मि देसकालम्मि ।
आलिहियभित्तिवाउल्लयं व न परम्मुहं ठाइ ॥ ६८ ॥
तं मित्तं कायव्वं जं मित्तं कालकम्बलीसरिसं ।
उययेण धोयमाणं सहावरङ्गं न मेल्लेइ ॥ ६९ ॥
सगुणाण निग्गुणाण य गरुया पालन्ति जं जि पडिवन्नं ।
पेच्छइ वसहेण समं हरेण वोलाविओ अप्पा ॥ ७० ॥
छिज्जउ सीसं अह होउ बन्धणं चयउ सव्वहा लच्छी ।
पडिवन्नपालणे सुपुरिसाण जं होइ तं होउ ॥ ७१ ॥

यैरेवोर्ध्वीकृता येषां प्रसादेन निर्गतप्रतापाः।
शबरा दहन्ति विन्ध्यं खलानां मार्ग एवापूर्वः ॥ ६२ ॥
सरसा अपि द्रुमा दावानलेन दह्यन्ते शुष्कसंवलिताः।
दुर्जनसङ्गे प्राप्ते सुजनोऽपि सुखं न प्राप्नोति ॥ ६३ ॥
खलसुजनयोर्दोषान् गुणांश्च को वर्णयितुं तरति लोके।
यदि नवरं नागराजो द्वाभ्यां जिह्वासहस्राभ्यां ॥ ६४ ॥

मित्रपद्धतिः।

एकमेव श्लाघ्यते दिनेशदिवसयोर्निर्वहणं।
आ जन्म एकैकाभ्यां याभ्यां विरह एव न दिष्टः ॥ ६५ ॥
प्रतिपन्नं दिनकरवासरयोर्द्वयोरखण्डितं शोभते।
सूर्यो न दिनेन विना दिनमपि न खलु सूर्यविरहे ॥ ६६ ॥
मित्रं पयस्तोयसमं सदृशं यन्न भवति किं तेन।
अधिकायते मिलद्दाघात्यावर्त्तं प्रथमं ॥ ६७ ॥
तन्मित्रं कर्तव्यं यत्किल व्यसने देशे काले च।
आलिखितभित्तिपुत्रक इव न पराङ्मुखं तिष्ठति ॥ ६८ ॥
तन्मित्रं कर्तव्यं यन्मित्रं कालकम्बलीसदृशं।
उदकेन धाव्यमानं स्वभावरङ्गं न मुञ्चति ॥ ६९ ॥
सगुणानां निर्गुणानां च गुरवः पालयन्ति यदेव प्रतिपन्नं।
प्रेक्षत वृषभेण समं हरेणातिक्रामित आत्मा ॥ ७० ॥
छिद्यतां शीर्षमथ भवतु बन्धनं त्यजतु सर्वथा लक्ष्मीः।
प्रतिपन्नपालने सुपुरुषाणां यद्भवति तद्भवतु ॥ ७१ ॥

दिढलोहसङ्कलाणं अन्नाण वि विविहपासबन्धाणं ।
ताणं चिय अहिययरं वायाबन्धं कुलीणस्स ॥ ७२ ॥

नेहवज्जा ।

चन्दो धवलिज्जइ पुण्णिमाए अह पुण्णिमा वि चन्देण ।
समसुहदुक्खाइ समे पुन्नेण विणा न लब्भन्ति ॥ ७३ ॥
एक्काए नवरि नेहो पयासिओ तिहुयणम्मि जोण्हाए ।
जा झिज्जइ झीणे ससहरम्मि वड्ढेइ वड्ढन्ते ॥ ७४ ॥
झिज्जइ झीणम्मि सया वड्ढइ वड्ढन्तयम्मि सविसेसं ।
सायरससीण छज्जइ जयम्मि पडिवन्ननिव्वहणं ॥ ७५ ॥
पडिवन्नं जेण समं पुव्वनिओएण होइ जीवस्स ।
दूरट्ठिओ न दूरे जह चन्दो कुमुयसण्डाणं ॥ ७६ ॥
दूरट्ठिया न दूरं सज्जणचित्ताण पुव्वमिलियाणं ।
गयणट्ठिओ वि चन्दो आसासइ कुमुयसण्डाइं ॥ ७७ ॥
दिट्ठे वि कि होइ सुहं जइ वि न पावन्ति अङ्गसङ्गाइं ।
दूरट्ठिओ वि चन्दो सुणिव्वुइं कुणइ कुमुयाणं ॥ ७८ ॥
एमेव कहवि कस्स वि केण वि दिट्ठेण होइ परिओसो ।
कमलायराण रइणा किं कज्जं जेण वियसन्ति ॥ ७९ ॥
कत्तो उग्गमइ रवी कत्तो वियसन्ति पङ्कयवणाइं ।
सुयणाण जत्थ नेहो न चलइ दूरट्ठियाणं पि ॥ ८० ॥

दृढलोहशृङ्खलेभ्योऽन्येभ्योऽपि विविधपाशबन्धेभ्यः।
तेभ्य एवाधिकतरं वाग्बन्धनं कुलीनस्य ॥ ७२ ॥

स्नेहपद्धतिः।

चन्द्रो धवलीक्रियते पूर्णिमयाथ पूर्णिमापि चन्द्रेण।
समसुखदुःखानि मन्ये पुण्येन विना न लभ्यन्ते ॥ ७३ ॥
एकया नवरं स्नेहः प्रकाशितस्त्रिभुवने ज्योत्स्नया।
या क्षीयते क्षीणे शशधरे वर्धते वर्धमाने ॥ ७४ ॥
क्षीयते क्षीणे सदा वर्धते वर्धमाने सविशेषं।
सागरशशिनो राजते जगति प्रतिपन्ननिर्वहणं ॥ ७५ ॥
प्रतिपन्नं येन समं पूर्वनियोगेन भवति जीवस्य।
दूरस्थितो न दूरे यथा चन्द्रः कुमुदषण्डानां ॥ ७६ ॥
दूरस्थिता न दूरं सज्जनचित्तानां पूर्वमिलितानां।
गगनस्थितोऽपि चन्द्र आशास्ते कुमुदषण्डानि ॥ ७७ ॥
दृष्टेऽपि खलु भवति सुखं यद्यपि न प्राप्नुवन्त्यङ्गसङ्गान्।
दूरस्थितोऽपि चन्द्रः सुष्ठु निर्वृतिं करोति कुमुदानां ॥ ७८ ॥
एवमेव कथमपि कस्यापि केनापि दृष्टेन भवति परितोषः।
कमलाकराणां रविणा किं कार्यं येन विकसन्ति ॥ ७९ ॥
कुत उद्गच्छति रविः कुतो विकसन्ति पङ्कजवनानि।
सुजनानां यत्र स्नेहो न चलति दूरस्थितानामपि ॥ ८० ॥

नीइवज्जा ।

जं अस्स मम्मभेयं चालिज्जन्तं च दूमए हियय़ं ।
तं तस्स कग्गकडुयं कुलेसु जाया न जम्पन्ति ॥ ८१ ॥
सन्तेहि असन्तेहि य परस्स किं जम्पिएहि दोसेहिं ।
अत्थो जसो न लब्भइ सो वि अमित्तो कओ होइ ॥ ८२ ॥
अप्पहियं कायव्वं जइ सक्कइ परहियं च कायव्वं ।
अप्पहियपरहियाणं अप्पहियं चेव कायव्वं ॥ ८३ ॥
पुरिसे सच्चसमिद्धे अलियपमुक्के सहावसंतुट्ठे ।
तवधम्मनियमसइए विसमा वि दसा समा होइ ॥ ८४ ॥
सीलं वरं कुलाओ दालिद्दं भव्वयं च रोगाओ ।
विज्जा रज्जाउ वरं खमा वरं सुट्ठु वि तवाओ ॥ ८५ ॥
सीलं वरं कुलाओ कुलेण किं होइ विगयसीलेण ।
कमलाइ कद्दमे संभवन्ति न हु हुन्ति मलिणाइं ॥ ८६ ॥
जं जि खमेइ समत्थो धणवन्तो जं न गव्वमुव्वहइ ।
जं च सविज्जो नमिरो तिसु तेसु अलङ्किया पुहवी ॥ ८७ ॥
छन्दं जो अणुवट्टइ मम्मं रक्खइ गुणे पयासेइ ।
सो नवरि माणुसाणं देवाण वि वल्लहो होइ ॥ ८८ ॥
छणवज्जणेण वरिसो नासइ दिवसो कुभोयणे भुत्ते ।
कुकलत्तेण य जम्मो नासइ धम्मो अधम्मेण ॥ ८९ ॥
छम्मं धम्मं पयडं च पोरिसं परकलत्तवज्जणयं ।
गञ्जणरहिओ जम्मो राढाइत्ताण संपडइ ॥ ९० ॥

नीतिपद्धतिः ।

यद्यस्य मर्मभेदं चाल्यमानं च दूयते हृदयं ।
तत्तस्य कर्णकटुं कुलेषु जाता न जल्पन्ति ॥ ८१ ॥
सद्भिरसद्भिश्च परस्य किं जल्पितैर्दोषैः ।
अर्थो यशो न लभ्यते स चामित्रीकृतो भवति ॥ ८२ ॥
आत्महितं कर्तव्यं यदि शक्यते परहितं च कर्तव्यं ।
आत्महितपरहितयोरात्महितं चैव कर्तव्यं ॥ ८३ ॥
पुरुषे सत्यसमृद्धेऽलीकप्रमुक्ते स्वभावसंतुष्टे ।
तपोधर्मनियममये विषमापि दशा समा भवति ॥ ८४ ॥
शीलं वरं कुलाद्दारिद्र्यं भव्यं च रोगात् ।
विद्या राज्याद्वरं क्षमा वरं सुष्ठ्वपि तपसः ॥ ८५ ॥
शीलं वरं कुलात्कुलेन किं भवति विगतशीलेन ।
कमलानि कर्दमे संभवन्ति न खलु भवन्ति मलिनानि ॥ ८६ ॥
यदेव क्षम्यति समर्थो धनवान्यद्गर्वं नोद्वहते ।
यच्च सविद्यो नम्रस्त्रिभिरेभिरलङ्कृता पृथ्वी ॥ ८७ ॥
छन्दं योऽनुवर्तते मर्म रक्षति गुणान् प्रकाशयति ।
स केवलं मानुषाणां देवानामपि वल्लभो भवति ॥ ८८ ॥
क्षणवञ्चनेन वर्षो नश्यति दिवसः कुभोजने भुक्ते ।
कुकलत्रेण च जन्म नश्यति धर्मोऽधर्मेण ॥ ८९ ॥
छन्नं धर्मं प्रकटं च पौरुषं परकलत्रवर्जनं ।
कलङ्करहितं जन्म भव्यात्मनां संपद्यते ॥ ९० ॥

धीरवज्जा ।

अप्पाणं अमुयन्ता　जे आरम्भन्ति दुग्गमं कज्जं ।
परमुहपलोइयाणं　ताणं कह होइ जयलच्छी ॥ ९१ ॥
सिग्घं आरुह कज्जं　पारद्धं मा कहिं पि सिढिलेसु ।
पारद्धसिढिलियाइं　कज्जाइ पुणो न सिज्झन्ति ॥ ९२ ॥
अच्छउ ता इयरजणो　अङ्के च्चिय जाइ पच्चभूयाइं ।
ताइं चिय लज्जिज्जइ　पारद्धं परिहरन्तेण ॥ ९३ ॥
खीणविहवो वि सुयणो　सेवइ रण्णं न पत्थए अन्नं ।
मरणे वि अइमहग्घं　न विक्किणइ माणमाणिक्कं ॥ ९४ ॥
बे मग्गा भुवणयले　माणिणि माणुन्नयाण पुरिसाणं ।
अहवा पावन्ति सिरिं　अहव भमन्ता समप्पन्ति ॥ ९५ ॥
बेण्णि वि हुन्ति गईओ　साहसवन्ताण धीरपुरिसाणं ।
वेल्लहलकमलहत्था　रायसिरी अहव पव्वज्जा ॥ ९६ ॥
अहवा मरन्ति गुरुवसणपेल्लिया खण्डिऊण नियजीहं ।
नो गन्तूण खलाणं　चवन्ति दीणक्खरं धीरा ॥ ९७ ॥
अह सुप्पइ पियमालिङ्गिऊण उत्तुङ्गथोरथणवट्टे ।
अह नरकरङ्ककङ्कालसङ्कुले भीसणमसाणे ॥ ९८ ॥
अह भुञ्जइ सह पियकामिणीहि कच्चोलथालसिप्पीहिं ।
अहवा विमलकवाले　भिक्खं भमिऊण पेयवणे ॥ ९९ ॥
नमिऊण जं विढप्पइ　खलचलणं तिहुयणं पि किं तेण ।
माणेण जं विढप्पइ　तणं पि तं निव्वुइं कुणइ ॥ १०० ॥

धीरपद्धतिः ।

आत्मानममुञ्चन्तो य आरभ्यन्ते दुर्गमं कार्यं ।
परमुखावलोकिनां तेषां कथं भवति जयलक्ष्मीः ॥ ९१ ॥
शीघ्रमारुह कार्यं प्रारब्धं मा कथमपि शिथिलय ।
प्रारब्धशिथिलितानि कार्याणि पुनर्न सिध्यन्ति ॥ ९२ ॥
आस्तां तावदितरजनोऽङ्ग एव यानि पञ्चभूतानि ।
तेभ्य एव लज्यते प्रारब्धं परिहरता ॥ ९३ ॥
क्षीणविभवोऽपि सुजनः सेवतेऽरण्यं न प्रार्थयतेऽन्यं ।
मरणेऽप्यतिमहार्घं न विक्रीणाति मानमाणिक्यं ॥ ९४ ॥
द्वौ मार्गौ भुवनतले मानिनि मानोन्नतानां पुरुषाणां ।
अथवा प्राप्नुवन्ति श्रियमथवा भ्रमन्तः समाप्यन्ते ॥ ९५ ॥
द्वेऽपि भवतो गती साहसवतां धीरपुरुषाणां ।
कोमलकमलहस्ता राजश्रीरथवा प्रव्रज्या ॥ ९६ ॥
अथवा म्रियन्ते गुरुव्यसनक्षिप्ताः खण्डयित्वा निजजिह्वां ।
नो गत्वा खलानां जल्पन्ति दीनाक्षरं धीराः ॥ ९७ ॥
अथ सुप्यते प्रियामालिङ्ग्य उत्तुङ्गपृथुस्तनपृष्ठे ।
अथ नरकरङ्ककङ्कालसङ्कुले भीषणश्मशाने ॥ ९८ ॥
अथ भुङ्क्ते सह प्रियकामिनीभिः कच्चोलस्थालशुक्तिभिः ।
अथवा विमलकपाले भिक्षां भ्रान्त्वा प्रेतवने ॥ ९९ ॥
नत्वा यदर्ज्यते खलचरणांस्त्रिभुवनमपि किं तेन ।
मानेन यदर्ज्यते तृणमपि तन्निर्वृतिं करोति ॥ १०० ॥

ते धन्ना ताण नमो ते गरुया माणिणो थिरारम्भा ।
जे गरुयवसणपडिपेल्लिया वि अन्नं न पत्थन्ति ॥ १०१ ॥

तुङ्गो च्चिय होइ मणो मणंसिणो अन्तिमासु वि दसासु ।
अत्थन्तस्स वि रविणो किरणा उद्धं चिय फुरन्ति ॥ १०२ ॥

ता तुङ्गो मेरुगिरी मयरहरो ताव होइ दुत्तारो ।
ता विसमा कज्जगई जाव न धीरा पवज्जन्ति ॥ १०३ ॥

ता वित्थिण्णं गयणं ताव च्चिय जलहरा अइगहीरा ।
ता गरुया कुलसेला जाव न धीरेहि तुल्लन्ति ॥ १०४ ॥

मेरुं तिणं व सग्गं घरङ्गणं हत्थछित्तं गयणयलं ।
वाहलियाउ समुद्दा साहसवन्ताण पुरिसाणं ॥ १०५ ॥

संघडियघडियविघडिय — घडन्तविघडन्तसंघडिज्जन्तं ।
अवहत्थिऊण दिव्वं करेइ धीरो समारद्धं ॥ १०६ ॥

साहसवज्जा ।

साहसमवलम्बन्तो पावइ हियइच्छियं न सन्देहो ।
जेणुत्तमङ्गमेत्तेण राहुणा कवलिओ चन्दो ॥ १०७ ॥

तं किं पि साहसं साहसेण साहन्ति साहससहावा ।
जं भविऊण दिव्वो परम्मुहो धुणइ नियसीसं ॥ १०८ ॥

थरहरइ धरा खुब्भन्ति सायरा होइ विम्हलो दइवो ।
असमववसायसाहस — संलद्धजसाण धीराणं ॥ १०९ ॥

अगणियसमविसमाणं साहसतुङ्गे समारुहन्ताणं ।
रक्खइ धीराण मणं आसन्नभयाउलो दइवो ॥ ११० ॥

ते धन्यास्तेभ्यो नमस्ते गुरवो मानिनः स्थिरारम्भाः ।
ये गुरुव्यसनप्रतिप्रेरिता अप्यन्यं न प्रार्थयन्ते ॥ १०१ ॥
तुङ्गमेव भवति मनो मनस्विनोऽन्तिमास्वपि दशासु ।
अस्तमयमानस्यापि रवेः किरणा ऊर्ध्वमेव स्फुरन्ति ॥ १०२ ॥
तावत्तुङ्गो मेरुगिरिर्मकरगृहं तावद्भवति दुस्तारं ।
तावद्विषमा कार्यगतिर्यावन्न धीराः प्रपद्यन्ते ॥ १०३ ॥
तावद्विस्तीर्णं गगनं तावदेव जलधरा अतिगम्भीराः ।
तावद्गुरुकाः कुलशैला यावन्न धीरैस्तुल्यन्ते ॥ १०४ ॥
मेरुस्तृणमिव स्वर्गो गृहाङ्गणं हस्तस्पृष्टं गगनतलं ।
क्षुद्रनद्यः समुद्राः साहसवतां पुरुषाणां ॥ १०५ ॥
संघटितघटितविघटितघटमानविघटमानसंघट्यमानं ।
अपहस्त्य दैवं करोति धीरः समारब्धं ॥ १०६ ॥

साहसपद्धतिः ।

साहसमवलम्बमानः प्राप्नोति हृदयेप्सितं न सन्देहः ।
येनोत्तमाङ्गमात्रेण राहुणा कवलितश्चन्द्रः ॥ १०७ ॥
तत्किमपि साहसं साहसेन साधयन्ति साहसस्वभावाः ।
यद्भावयित्वा दैवं पराङ्मुखं धूनयति निजशिरः ॥ १०८ ॥
कम्पते धरा क्षुभ्यन्ति सागरा भवति विक्लवं दैवं ।
असमव्यवसायसाहससंलग्नप्रसेभ्यो धीरेभ्यः ॥ १०९ ॥
अगणितसमविषमाणां साहसतुङ्गे समारोहतां ।
रक्षति धीराणां मन आसन्नभयाकुलं दैवं ॥ ११० ॥

तं किं पि कम्मरयणं धीरा ववसन्ति साहसवसेणं।
जं बम्भहरिहराण वि लग्गइ चित्ते चमक्कारो ॥ १ १ १ ॥
धीरेण समं समसीसियाए रे दिव्व आरुहन्तस्स।
होहिइ किं पि कलङ्कं धुव्वन्तं जं न फिट्टिहिइ ॥ १ १ २ ॥
जह जह न समप्पइ विहि — वसेण विहडन्तकज्जपरिणामो।
तह तह धीराण मणे वड्ढइ बिउणो समुच्छाहो ॥ १ १ ३ ॥
फलसंपत्तीए समोणयाइ तुङ्गाइ फलविपत्तीए।
हिययाइ सुपुरिसाणं महातरूणं व सिहराइं ॥ १ १ ४ ॥
हियए जाओ तत्थेव वड्ढिओ नेय पयडिओ लोए।
ववसायपायवो सुपुरिसाण लक्खिज्जइ फलेहिं ॥ १ १ ५ ॥
ववसायफलं विहवो विहवस्स य विहलजणसमुद्धरणं।
विहलुद्धरणेण जसो जसेण भण किं न पज्जत्तं ॥ १ १ ६ ॥
आढत्ता सप्पुरिसेहि तुङ्गववसायदिन्नहियएहिं।
कज्जारम्भा होहिन्ति निप्फला कह चिरं कालं ॥ १ १ ७ ॥
न महुमहणस्स वच्छे मज्झे कमलाण नेय खीरहरे।
ववसायसायरे सुपुरिसाण लच्छी फुडं वसइ ॥ १ १ ८ ॥
तद्दियहारम्भावावडाणं मित्तेक्ककज्जरसियाणं।
रविरहतुरयाण व सुपुरिसाण न हु हिययवीसामो ॥ १ १ ९ ॥

दिव्ववज्जा।

अत्थो विज्जा पुरिसत्तणं च अन्नाइ गुणसहस्साइं।
दिव्वायत्ते कज्जे सव्वाइ नरस्स विहडन्ति ॥ १ २ ० ॥

तत्किमपि कर्मरत्नं धीरा व्यवस्यन्ति साहसवशेन ।
यद्ब्रह्महरिहराणामपि लगति चित्ते चमत्कारः ॥ १११ ॥
धीरेण समं स्पर्धया रे दैवाहृतः ।
भविष्यति कोऽपि कलङ्को धाव्यमानो यो न यास्यति ॥ ११२ ॥
यथा यथा न समाप्यते विधिवशेन विघटमानकार्यपरिणामः ।
तथा तथा धीराणां मनसि वर्धते द्विगुणः समुत्साहः ॥ ११३ ॥
फलसंपत्त्या समवनतानि तुङ्गानि फलविपत्त्या ।
हृदयानि सुपुरुषाणां महातरूणामिव शिखराणि ॥ ११४ ॥
हृदये जातस्तत्रैव वर्धितो नैव प्रकटितो लोके ।
व्यवसायपादपः सुपुरुषाणां लक्ष्यते फलैः ॥ ११५ ॥
व्यवसायफलं विभवो विभवस्य च विकलजनसमुद्धरणं ।
विकलोद्धरणेन यशो यशसा भण किं न पर्याप्तं ॥ ११६ ॥
आरब्धाः सत्पुरुषैस्तुङ्गव्यवसायदत्तहृदयैः ।
कार्यारम्भा भविष्यन्ति निष्फलाः कथं चिरं कालं ॥ ११७ ॥
न मधुमथनस्य वक्षसि मध्ये कमलानां नैव क्षीरनिधौ ।
व्यवसायसागरे सुपुरुषाणां लक्ष्मीः स्फुटं वसति ॥ ११८ ॥
तद्दिवसारम्भव्यापृतानां सिद्धैककार्यरसिकानां ।
रविरथतुरगाणामिव सुपुरुषाणां न खलु हृदयविश्रामः ॥ ११९ ॥

दैवपद्धतिः ।

अर्थो विद्या पौरुषत्वं चान्यानि गुणसहस्राणि ।
दैवायत्ते कार्ये सर्वाणि नरस्य विघटन्ते ॥ १२० ॥

सत्थत्थे पडियस्स वि मज्झेणं एइ किंपि तं कज्जं ।
जं न कहिउं न सहिउं न चेव पच्छाइउं तरइ ॥१२१॥
जइ विसइ विसमविवरे लङ्घइ उअहिं करेइ ववसायं ।
तह वि हु फलं न पावइ पुरिसो दिव्वे पराहुत्ते ॥१२२॥
नग्घन्ति गुणा विहडन्ति बन्धवा वल्लहा विरज्जन्ति ।
ववसाओ न समप्पइ नरस्स दिव्वे पराहुत्ते ॥१२३॥
जा जा डाला लम्बइ हत्थं गहिऊण वीसमइ जत्थ ।
सा सा तडत्ति तुट्टइ नरस्स दिव्वे पराहुत्ते ॥१२४॥
जं नयणेहि न दीसइ हियएण वि जं न चिन्तियं कइवि ।
तं तं सिरम्मि निवडइ नरस्स दिव्वे पराहुत्ते ॥१२५॥

विहिवज्जा ।

खण्डिज्जइ विहिणा ससहरो वि सूरस्स होइ अत्थमणं ।
हा दिव्वपरिणईए कवलिज्जइ को न कालेणं ॥१२६॥
को एत्थ सया सुहिओ कस्स व लच्छी थिराइ पेम्माइं ।
कस्स व न होइ खलणं भण को हु न खण्डिओ विहिणा ॥१२७॥
उन्नय नीया नीया वि उन्नया हुन्ति तक्खणं चेव ।
विहिपरिणामियकज्जं हरिहरबम्हा न याणन्ति ॥१२८॥
विहिणा जं चिय लिहियं नलाडवट्टीए तेण दइवेण ।
पच्छा सो वि पसन्नो अन्नह करिउं न हु समत्थो ॥१२९॥
किं करइ किर वराओ साहसववसायमाणगरुओ वि ।
पुरिसो भग्गपयावो विहिणा विवरीयरूवेण ॥१३०॥

स्वस्थार्थे पतितस्यापि मध्येनैति तत्किमपि कार्यं।
यन्न कथयितुं न सोढुं न चैव प्रच्छादयितुं शक्नोति ॥१२१॥
यदि विशति विषमविवरे लङ्घत्युदधिं कुरुते व्यवसायं।
तथापि खलु फलं न प्राप्नोति पुरुषो दैवे पराङ्मुखे ॥१२२॥
नार्घन्ति गुणा विघटन्ते बान्धवा वल्लभा विरज्यन्ते।
व्यवसायो न समाप्यते नरस्य दैवे पराङ्मुखे ॥१२३॥
यां यां शाखां लम्बते हस्तेन गृहीत्वा विश्राम्यति यस्यां।
सा सा तटेति च्युयति नरस्य दैवे पराङ्मुखे ॥१२४॥
यन्नयनाभ्यां न दृश्यते हृदयेनापि यन्न चिन्तितं कथमपि।
तत्तच्छिरसि निपतति नरस्य दैवे पराङ्मुखे ॥१२५॥

विधिपद्धतिः।

खण्ड्यते विधिना शशधरोऽपि सूर्यस्य भवत्यस्तमनं।
हा दैवपरिणत्या कवलीक्रियते को न कालेन ॥१२६॥
कोऽत्र सदा सुखितः कस्य वा लक्ष्मीः स्थिराणि प्रेमाणि।
कस्य वा न भवति स्खलनं भण कः खलु विधिना खण्डितः ॥१२७॥
उन्नता नीचा नीचा अप्युन्नता भवन्ति तत्क्षणादेव।
विधिपरिणमितकार्यं हरिहरब्रह्माणो न जानन्ति ॥१२८॥
विधिना यदेव लिखितं ललाटपट्टे तेन दैवेन।
पश्चात्सोऽपि प्रसन्नोऽन्यथा कर्तुं न खलु समर्थः ॥१२९॥
किं करोति वराकः किल साहसव्यवसायमानगुरुरपि।
पुरुषो भग्नप्रतापो विधिना विपरीतक्रमेण ॥१३०॥

बेण्णि वि महणारम्भे पेच्छह जं पुव्वकम्मपरिणामो ।
उप्पज्जइ हरह विसं कण्हस्स घणत्थणा लच्छी ॥१२१॥
विहिविहियं चिय लब्भइ अमयं देवाण मज्झमहे लच्छी ।
रयणायरम्मि महिए हरस्स भाए विसं जायं ॥१२२॥

दीनवज्जा ।

परपत्थणापवन्नं मा जणणि जणेसु एरिसं पुत्तं ।
उयरे वि मा धरिज्जसु पत्थणभङ्गो कओ जेण ॥१२३॥
ता रूवं ताव गुणा लज्जा सच्चं कुलक्कमो ताव ।
ताव च्चिय अहिमाणो देहि त्ति न भण्णए जाव ॥१२४॥
तिणतूलं पि हु लहुयं दीणं दइवेण निम्मियं भुवणे ।
वाएण किं न नीयं अप्पाणं पत्थणभएण ॥१२५॥
थरथरथरेइ हिययं जीहा घोलेइ कण्ठमज्झम्मि ।
नासइ मुहलावण्णं देहि त्ति परं भणन्तस्स ॥१२६॥
किसिणिज्जन्ति लयन्ता उदहिजलं जलहरा पयत्तेण ।
धवलीहुन्ति हु देन्ता देन्तलयन्तन्तरं पेच्छ ॥१२७॥

दारिद्दवज्जा ।

दारिद्दय तुज्झ गुणा गोविज्जन्ता वि धीरपुरिसेहिं ।
पाहुणएसु छणेसु य वसणेसु य पायडा हुन्ति ॥१२८॥
दारिद्दय तुज्झ नमो जस्स पसाएण एरिसी रिद्धी ।
पेच्छामि सयललोए ते मह लोया न पेच्छन्ति ॥१२९॥

द्वावपि मथनारम्भे प्रेचत यत्पूर्वकर्मपरिणामः।
उत्पद्यते हरस्य विषं कृष्णस्य घनस्तना लक्ष्मीः॥१२१॥
विधिविहितमेव लभ्यतेऽमृतं देवानां मधुमथने लक्ष्मीः।
रत्नाकरे मथिते हरस्य भागे विषं जातं॥१२२॥

दीनपद्धतिः।

परप्रार्थनाप्रपन्नं मा जननि जनयस्वेदृशं पुत्रं।
उदरेऽपि मा भ्रियस्व येन प्रार्थनाभङ्गः कृतः॥१२३॥
तावद्रूपं तावद्गुणा लज्जा सत्यं कुलक्रमस्तावत्।
तावदेवाभिमानो देहीति न भण्यते यावत्॥१२४॥
तृणतूलमपि खलु लघु दीनं देवेन निर्मितं भुवने।
वातेन किं न नीतमात्मानं प्रार्थनाभयेन॥१२५॥
कम्पते हृदयं जिह्वा घूर्णते कण्ठमध्ये।
नश्यति मुखलावण्यं देहीति परं भणतः॥१२६॥
कृष्णीभवन्ति गृह्णन्त उदधिजलं जलधराः प्रयत्नेन।
धवलीभवन्ति खलु ददतो ददत्कृत्यदन्तरं प्रेच॥१२७॥

दारिद्र्यपद्धतिः।

दारिद्र्य तव गुणा गोप्यमाना अपि धीरपुरुषैः।
प्राङ्गणेषु चणेषु च व्यसनेषु च प्रकटीभवन्ति॥१२८॥
दारिद्र्य तुभ्यं नमो यस्य प्रसादेनेदृश्यृद्धिः।
प्रेचामि सकललोकांस्ते मां लोका न प्रेचन्ति॥१२९॥

जे जे गुणिणो जे जे वि माणिणो जे वियड्ढसंमाणा ।
दालिद्द रे वियक्खण ताण तुमं साणुराओ सि ॥१४०॥

दीसन्ति जोयसिद्धा अञ्जणसिद्धा वि केवि दीसन्ति ।
दारिद्दजोयसिद्धं मं ते लोया न पेच्छन्ति ॥१४१॥

जे भग्गा विहवसमीरणेण वङ्कं ठवन्ति पयमग्गं ।
ते नूणं दालिद्दोसहेण जइ पञ्जलिज्जन्ति ॥१४२॥

किं वा कुलेण कीरइ किं वा विणएण किं व रूवेण ।
धणरहियाणं सुन्दरि नराण को आयरं कुणइ ॥१४३॥

जाई रूवं विज्जा तिन्नि वि गच्छन्तु कन्दरे विवरे ।
अत्थो च्चिय परिवड्ढउ जेण गुणा पायडा हुन्ति ॥१४४॥

धम्मत्थकामरहिया जे दियहा निद्धणाण वोलीणा ।
जइ ताइ गणेइ विही गणेउ न हु एरिसं जुत्तं ॥१४५॥

संकुयइ संकुयन्ते वियसइ वियसन्तयम्मि सूरम्मि ।
सिसिरे रोरकुडुम्बं पङ्कयलीलं समुव्वहइ ॥१४६॥

पहुवज्जा ।

छज्जइ पहुस्स ललियं पियाइ माणो खमासमत्थस्स ।
जाणन्तस्स य भणियं मोणं च अयाणमाणस्स ॥१४७॥

सच्छन्दं बोलिज्जइ किज्जइ जं नियमणस्स पडिहाइ ।
अजसस्स न बीहिज्जइ पहुत्तणं तेण रमणिज्जं ॥१४८॥

जम्मदिणे धणनिवडण—भएण दिज्जन्ति धाइउच्छङ्गे ।
पहुणो जं नीयरया मन्ने तं खीरमाहप्पं ॥१४९॥

ये ये गुणिनो ये येऽपि मानिनो ये विदग्धसंमानाः।
दारिद्र्य रे विचक्षण तेषु त्वं सानुरागोऽसि ॥१४०॥
दृश्यन्ते योगसिद्धा अञ्जनसिद्धा अपि केचन दृश्यन्ते।
दारिद्र्ययोगसिद्धं मां ते लोका न प्रेक्षन्ते ॥१४१॥
ये भग्ना विभवसमीरणेन वक्रं स्थापयन्ति पदमार्गं।
ते नूनं दारिद्र्यौषधेन यदि प्राञ्जला भवन्ति ॥१४२॥
किं वा कुलेन क्रियते किं वा विनयेन किं वा रूपेण।
धनरहितानां सुन्दरि नराणां क आदरं करोति ॥१४३॥
जाती रूपं विद्या त्रीण्यपि गच्छन्तु कन्दरे विवरे।
अर्थ एव परिवर्धतां येन गुणाः प्रकटीभवन्ति ॥१४४॥
धर्मार्थकामरहिता ये दिवसा निर्धनानामतिक्रान्ताः।
यदि तान् गणयति विधिर्गणयतु न खल्वीदृशं युक्तं ॥१४५॥
संकुचति संकुचति विकसति विकसति सूर्ये।
शिशिरे दरिद्रकुटुम्बं पङ्कजलीलां समुद्वहति ॥१४६॥

प्रभुपद्धतिः।

राजते प्रभोर्ललितं प्रियाया मानः क्षमासमर्थस्य।
जानतश्च भणितं मौनं चाजानतः ॥१४७॥
स्वच्छन्दं कथ्यते क्रियते यन्निजमनसः प्रतिभाति।
अयशसो न भीयते प्रभुत्वं तेन रमणीयं ॥१४८॥
जन्मदिवसे स्तननिपतनभयेन दीयन्ते धात्र्युत्सङ्गे।
प्रभवो यन्नीचरता मन्ये तत्क्षीरमाहात्म्यं ॥१४९॥

छिट्टट्टे जउनिवहं तह य सुपत्ताइ उत्तमङ्गेसु ।
जह होइ तह तह जइ पङ्गणो ता किं न पज्जत्तं ॥१५०॥

सेवयवज्जा ।

जं सेवयाण दुक्खं चारित्तविवज्जियाण नरणाह ।
तं होउ तुह रिऊणं अहवा ताणं पि मा होउ ॥१५१॥
भूमीसयणं जरचीरबन्धणं बम्भचेरयं भिक्खा ।
मुणिचरियं दुग्गयसेवयाण धम्मो परं नत्थि ॥१५२॥
जइ नाम कहव मोक्खं होइ तुलग्गेण सेवयजणस्स ।
तं खवणयसग्गारोहणं व विग्गोवयमणहिं ॥१५३॥
ओलग्गिओ वि धम्मम्मि होज्ज एण्हिं नरिन्द वच्चामो ।
आलिहियकुञ्जरस्स व तुह पङ्क दाणं चिय न दिट्ठं ॥१५४॥
आसन्नफलो फणसो व्व नाह सयलस्स सेवयजणस्स ।
अन्हं पुण पत्थिव पत्थिओ वि तालो तुमं जाओ ॥१५५॥
फणसेण समं महिमण्डलम्मि का तरुवराण ममसीसी ।
करिकुम्भसच्छहं मग्गणाण जो देइ फलनिवहं ॥१५६॥
वरिसिहिसि तुमं जलहर भरिहिसि भुवणन्तराइ नीसेसं ।
तण्हासुसियसरीरे मुयम्मि वप्पीहयकुडुम्बे ॥१५७॥
देहि त्ति कह नु भणइ सुपुरिसववहारबाहिरं वयणं ।
सेविज्जइ विणएणं एस च्चिय पत्थणा लोए ॥१५८॥
भुञ्जन्ति कमण्डसणा अब्भन्तरसंठिया गइन्दस्स ।
जे पुण विङ्करसहाया ते धवला बाहिर च्चेव ॥१५९॥

अधोऽधो जडनिवहं तथा च सुपत्राण्युत्तमाङ्गेषु।
यथा भवति तरुस्तथा यदि प्रभवस्तस्मात्किं न पर्याप्तं ॥१५०॥

सेवकपद्धतिः।

यत्सेवकानां दुःखं चारित्रविवर्जितानां नरनाथ।
तद्भवतु तव रिपूणामथवा तेषामपि मा भवतु ॥१५१॥
भूमीशयनं जरच्चीरबन्धनं ब्रह्मचर्यं भिक्षा।
मुनिचरितं दुर्गतसेवकानां धर्मः परं नास्ति ॥१५२॥
यदि नाम कथमिव सौख्यं भवति काकतालीयेन सेवकजनस्य।
तत्क्षपणकस्वर्गारोहणमिव व्याकुलभावशतैः ॥१५३॥
अवलग्नोऽसि धर्मे भूया इदानीं नरेन्द्र व्रजामः।
आलिखितकुञ्जरस्येव तव प्रभो दानमेव न दृष्टं ॥१५४॥
आसन्नफलो पनस इव नाथ सकलस्य सेवकजनस्य।
अस्माकं पुनः पार्थिव प्रार्थितोऽपि तालस्त्वं जातः ॥१५५॥
पनसेन समं महीमण्डले का तरुवराणां स्पर्धा।
करिकुम्भसदृक्षं मार्गणानां यो ददाति फलनिवहं ॥१५६॥
वर्षिष्यसि त्वं जलधर भरिष्यसि भुवनान्तराणि निःशेषं।
तृष्णाशोषितशरीरे मृते चातककुटुम्बे ॥१५७॥
देहीति कथं नु भण्यते सुपुरुषव्यवहारबहिर्भूतं वचनं।
सेव्यते विनयेनैषैव प्रार्थना लोके ॥१५८॥
भुञ्जते कृष्णदशना अभ्यन्तरसंस्थिता गजेन्द्रस्य।
ये पुनर्विधुरसहायास्ते धवला बहिरेव ॥१५९॥

तम्बाउ तिन्नि सुपओ — हराउ चत्तारि पक्कलवइल्ला ।
निप्पन्ना रालयमञ्जरीउ सेवा सुहं कुणउ ॥ १६० ॥
सव्वो कुहिओ सोहइ मढदेउलमन्दिरं च चच्चरयं ।
नरणाह मह कुडुम्बं कुहकुहियं दुव्वलं होइ ॥ १६१ ॥

सुहडवज्जा

जं दिज्जइ पहरपरव्वसेहि मुच्छागएहि पयमेक्कं ।
तह नेहस्स पयस्स व न याणिमो को समब्भहिओ ॥ १६२ ॥
भग्गे वि बले वलिए वि साहणे सामिए निरुच्छाहे ।
नियभुयविक्कमसारा थक्कन्ति कुलुग्गया सुहडा ॥ १६३ ॥
वियलइ धणं न माणं झिज्जइ अङ्गं न झिज्जइ पयावो ।
रूवं न चलइ फुरणं सिविणे वि मणंसियत्थाणं ॥ १६४ ॥
अवमाणिओ व्व संमाणिओ व्व नवसेवओ व्व कुविओ व्व ।
पहरइ कयावराहो व्व निब्भओ को वि सङ्गामे ॥ १६५ ॥
उयरे असिकप्परिए अन्तोहे निवडियम्मि चलणेसु ।
भमइ भडो जसलुद्धो ससङ्कलो मत्तहत्थि व्व ॥ १६६ ॥
दाहिणकरेण खग्गं वामेण सिरं धरेइ निवडन्तं ।
अन्तावेढियचलणो धाइ भडो एक्कमेक्कस्स ॥ १६७ ॥
अज्ज वि विङ्करो सुपइ अज्ज वि पहरन्ति सुहडसंघाया ।
अज्ज वि मज्झत्था जयसिरो वि ता जीव मा वच्च ॥ १६८ ॥
नेच्छइ सग्गग्गमणं कुवइ भडो सुरवहूहि निज्जन्तो ।
गहयपडिवक्खपेल्लिय — सामियकज्जे अणिव्वाए ॥ १६९ ॥

गावस्तिस्रः सुपयोधराश्चत्वारः समर्थवृषभाः।
निष्पन्ना शालकमञ्जर्यः सेवा सुखं करोतु ॥ १६० ॥
सर्वोः (क्षुधितः) धवलितः शोभते मठदेवकुलमन्दिरं च चत्वरं।
नरनाथ मम कुटुम्बं क्षुधितं दुर्बलं भवति ॥ १६१ ॥

सुभटपद्धतिः

यद्दीयते प्रहारपरवशैर्मूर्च्छागतैः पदमेकं।
तथा स्नेहस्य पयसो वा न जानीमः किमभ्यधिकं ॥ १६२ ॥
भग्नेऽपि बले वलितेऽपि साधने स्वामिनि निरुत्साहे।
निजभुजविक्रमसारास्तिष्ठन्ति कुलोद्गताः सुभटाः ॥ १६३ ॥
विगलति धनं न मानः चीयतेऽङ्गं न चीयते प्रतापः।
रूपं न चलति स्फुरणं स्वप्नेऽपि मनस्विसार्थानां ॥ १६४ ॥
अपमानित इव संमानित इव नवसेवक इव कुपित इव।
प्रहरति कृतापराध इव निर्भयः कोऽपि सङ्ग्रामे ॥ १६५ ॥
उदरेऽसिदारितेऽन्त्रौघे निपतिते चरणयोः।
भ्रमति भटो यशोलुब्धः सशृङ्खलो मत्तहस्तीव ॥ १६६ ॥
दक्षिणकरेण खड्गं वामेन शिरो निपतद्धारयति।
अन्त्रावेष्टितचरणो धावति भट एकैकस्य ॥ १६७ ॥
अद्यापि विधुरः सुप्रभुरद्यापि प्रहरन्ति सुभटसंघाताः।
अद्यापि मध्यस्था जयश्रीरपि तस्माज्जीव मा व्रज ॥ १६८ ॥
नेच्छति स्वर्गगमनं कुप्यति भटः सुरवधूभिर्नीयमानः।
गुरुकप्रतिपक्षक्षिप्तस्वामिकार्येऽनिर्मिते ॥ १६९ ॥

एक्को वि को वि नियगोत्तभूसणो धरउ जणणिउयरम्मि ।
जो रिउघडाण समुहो परम्मुहो परकलत्ताणं ॥ १७० ॥

वियडं सो परिसक्कउ सामिपसायं च सो समुव्वहउ ।
दुव्वारवेरिवारण — निवारणा जस्स भुयदण्डा ॥ १७१ ॥

एक्कं दन्तम्मि पयं बीयं कुम्भम्मि तइयमलहन्तो ।
बलिबन्धविलसियं मङ्ग — महस्स आलम्बए सुहडो ॥ १७२ ॥

चलचमरकण्णचालिर — विज्झिज्जन्तो भडो गइन्देण ।
ओ सुवइ सामिकयकज्जनिब्भरो दन्तपल्लङ्के ॥ १७३ ॥

गाढासणस्स कस्स वि उयरे निहयस्स मण्डलग्गेण ।
अद्धं महीए पडियं तुरङ्गपिट्ठिट्ठियं अद्धं ॥ १७४ ॥

सब्भावे पङ्कहियए जीए सग्गे जसे जए सयले ।
ठविए रणम्मि सीसे कयकज्जो नच्चिओ सुहडो ॥ १७५ ॥

छिन्ने रणम्मि बहुपहुपसायमालापडिच्छिरे सीसे ।
उत्तिण्णगरुयभारं व नच्चियं नरवरकबन्धं ॥ १७६ ॥

पक्खाणिलेण पहुणो विरमउ मुच्छ त्ति पासपडिएण ।
गिद्धुन्तकड्ढणं दूसहं पि साहिज्जइ भडेण ॥ १७७ ॥

वच्छत्थलं च सुहडस्स रुहिरकुङ्कुमविलित्तयङ्गस्स ।
वरकामिणि व्व चुम्बइ उरे निसन्ना सिवा वयणं ॥ १७८ ॥

धवलवज्जा

संचुण्णियथोरजुयप्पहारसंजणियगरुयकिणसोहो ।
धवलस्स महाभरकड्ढणाइ कन्धो च्चिय कहेइ ॥ १७९ ॥

एकोऽपि कोऽपि निजगोत्रभूषणो प्रियते जनन्युदरे।
यो रिपुघटानां संमुखः पराङ्मुखः परकलत्रेभ्यः॥ १७०॥
विकटं स परिक्रामतु स्वमिप्रसादं च स समुद्वहतु।
दुर्वारवैरिवारणनिवारणा यस्य भुजदण्डाः॥ १७१॥
एकं दन्ते पदं द्वितीयं कुम्भे तृतीयमलभमानः।
बलिबन्धविलसितं मधुमथ आलम्बते सुभटः॥ १७२॥
चलचमरचालनशीलकर्णवीज्यमानो भटो गजेन्द्रेण।
अहो स्वपिति स्वामिकृतकार्यनिर्भरो दन्तपल्यङ्के॥ १७३॥
गाढासनस्य कस्याप्युदरे निहतस्य मण्डलाग्रेण।
अर्धं मह्यां पतितं तुरङ्गपृष्ठस्थितमर्धं॥ १७४॥
सद्भावे प्रभुहृदये जीवे स्वर्गे यशसि सकले जगति।
स्थापिते रणे शिरसि कृतकार्यो नर्तितः सुभटः॥ १७५॥
छिन्ने रणे बहुप्रभुप्रसादमालाप्रतीच्छणशीले शिरसि।
उत्तीर्णगुरुकभारमिव नर्तितं नरवरकबन्धं॥ १७६॥
पक्षानिलेन प्रभोर्विरमतु मूर्छेति पार्श्वपतितेन।
गृध्रान्त्राकर्षणं दुःसहमपि सह्यते भटेन॥ १७७॥
वक्षःस्थलं च सुभटस्य रुधिरकुङ्कुमविलिप्ताङ्गस्य।
वरकामिनीव चुम्बत्युरसि निषण्णा शिवा वदनं॥ १७८॥

धवलपद्धतिः

संचूर्णितपृथुयुगप्रहारसंजनितगुरुकिणशोभः।
धवलस्य महाभरकर्षणानि स्कन्ध एव कथयति॥ १७९॥

अह मरइ धुरालग्गो संचुण्णियसन्धिबन्धणो धवलो ।
न हु पामरस्स विहुरे आरापरिघट्टणं महइ ॥ १८० ॥
अह तोडइ नियकन्धं अह कड्डइ गुरुभरम्मि दुव्वोज्झं ।
धवलो धुरम्मि जुत्तो न सहइ उच्चारियं हक्कं ॥ १८१ ॥
चिक्कणचिखल्लसचड्डचक्कथक्के भरम्मि जाणिहिसि ।
अविसेसणय गहवइ परम्मुहो जं सि धवलाणं ॥ १८२ ॥
अमुणियगुणो न जुप्पइ न मुणिज्जइ स य गुणो अजुत्तस्स ।
थक्के भरे विसूरइ अउव्ववग्गं गओ धवलो ॥ १८३ ॥
सो च्चिय सयडे सो च्चिय हलम्मि सो च्चिय वहेइ पिट्ठीए ।
बहुगोधणो वि हलिओ नन्दइ एक्केण धवलेण ॥ १८४ ॥
कत्तो लब्भन्ति धुरंधराइ धवलाइ भरसमत्थाइं ।
अइविहुरे गुरुभारं कड्डन्ति य लीलमत्ताए ॥ १८५ ॥

विञ्झवज्जा

दन्तक्खोहं तडवियडमोडणं सरसपल्लवुल्लिहणं ।
जइ विञ्झो च्चिय न सहइ ता करिणो कत्थ वच्चन्ति ॥ १८६ ॥
सा रेवा ताइं पाणियाइ ते च्चेव करिणिसंघाया ।
सा सल्लइ सल्लइ गय — वरस्स विञ्झं मुयन्तस्स ॥ १८७ ॥
विञ्झेण विणा वि गया नरवइभुवणेसु गोरविज्जन्ति ।
विञ्झो न होइ अगओ गएहि बहुएहि वि गएहिं ॥ १८८ ॥
गोमहिसतुरङ्गाणं पसूण सव्वाण जुज्जए ठाणं ।
दइगइन्दाण पुणो अह विञ्झो अह महाराओ ॥ १८९ ॥

अथ म्रियते धुरालग्नः संचूर्णितसन्धिबन्धनो धवलः ।
न खलु पामरस्य विधुर आरापरिघट्टणं सहते ॥ १८० ॥
अथ त्रोटयति निजस्कन्धमथ कर्षति गुरुभरे दुर्वाह्यं ।
धवलो धुरि युक्तो न सहत उच्चारितं प्रेरणं ॥ १८१ ॥
चिक्कणचिक्खल्लमग्नचक्रस्थिते भरे ज्ञास्यसि ।
अविशेषज्ञ गृहपते पराङ्मुखो यदसि धवलेभ्यः ॥१८२ ॥
अज्ञातगुणो न युज्यते न ज्ञायते स च गुणोऽयुक्तस्य ।
स्थिते भरे खिद्यतेऽपूर्वबल्लां गतो धवलः ॥ १८३ ॥
स एव शकटे स एव हले स एव वहति पृष्ठ्यां ।
बहुगोधनोऽपि हालिको नन्दत्येकेन धवलेन ॥ १८४ ॥
कुतो लभ्यते धुरंधरा धवला भरसमर्थाः ।
अतिविधुरे गुरुभरं कर्षन्ति च लीलामात्रेण ॥ १८५ ॥

विन्ध्यपद्धतिः

दन्तक्षोभं तटविकटमोटनं सरसपल्लवोल्लेखनं ।
यदि विन्ध्य एव न सहते तदा करिणः कुतो व्रजन्ति ॥ १८६ ॥
सा रेवा तानि पानीयानि त एव करिणीसंघाता. ।
सा शल्लकी शल्यायते गजवरस्य विन्ध्यं मुञ्चतः ॥ १८७ ॥
विन्ध्येन विनापि गजा नरपतिभुवनेषु गौरविता भवन्ति ।
विन्ध्यो न भवत्यगजो गजैर्बहुभिरपि गतैः ॥ १८८ ॥
गोमहिषतुरङ्गाणां पशूनां सर्वाणां युज्यते स्थानं ।
दग्धगजेन्द्राणां पुनोऽथ विन्ध्योऽथ महाराजः ॥ १८९ ॥

गयवज्जा

वियसियमएण गयजोव्वणेण उल्लन्तदन्तमुसलेण ।
अज्ज वि वणं सणाहं जूहाहिव पइ जियन्तेण ॥ १९० ॥

अज्ज वि संभरइ गओ मज्जन्तो सरवरम्मि लीलाए ।
जं करिणिकरग्गुम्मूलिएण पहओ मुणालेण ॥ १९१ ॥

मा सुमरसु चन्दणपल्लवाण करिणाह गेण्ह तिणकवलं ।
जं जह परिणमइ दसा तं तह धीरा पडिच्छन्ति ॥ १९२ ॥

मा झिज्जसु अणुदियहं करिणिविओएण मूढकरिणाह ।
सोक्खं न होइ कस्स वि निरन्तरं एत्थ संसारे ॥ १९३ ॥

जायासुयविरहविसंठुलस्स जूहाहिवस्स विञ्झम्मि ।
ते सरसपल्लवा सल्लईए विसकवलसारिच्छा ॥ १९४ ॥

गइयकुहाउलियस्स य वल्लहकरिणीसुहं भरन्तस्स ।
सरसो मुणालकवलो गयस्स हत्थे च्चिय विलीणो ॥ १९५ ॥

तह नीससियं जूहाहिवेण चिरविलसियं भरन्तेण ।
करगहियं तिणकवलं हरियं जह झत्ति पज्जलियं ॥ १९६ ॥

विरहपलित्तो रे वर-गइन्द मा भञ्ज सयलवणराई ।
उम्मूलिए वि विञ्झे विरहावत्था तह च्चेय ॥ १९७ ॥

जूहाओ वणगहणं गहणाउ सरं सराउ गिरिसिहरं ।
सिहराहिंतो पुहवी निएइ हत्थी पियाविरहे ॥ १९८ ॥

करिणिकरप्पियनवसरसल्लईकवलभोयणं दन्ती ।
जइ न मरइ सुमरन्तो ता किं किसिओ वि मा होउ ॥१९९॥

गजपद्धतिः

विगलितमदेन गतयौवनेन चलद्दन्तमुसलेन ।
अद्यापि वनं सनाथं यूथाधिप त्वया जीवता ॥ १९० ॥
अद्यापि संस्मरति गजो मज्जन् सरोवरे लीलया ।
यत्करिणीकराग्रोन्मूलितेन प्रहतो मृणालेन ॥ १९१ ॥
मा स्मर चन्दनपल्लवानां करिनाथ गृहाण तृणकवलं ।
या यथापरिणमति दशा तां तथा धीराः प्रतीच्छन्ति ॥ १९२ ॥
मा क्षीयस्वानुदिवसं करिणिवियोगेन मूढकरिनाथ ।
सौख्यं न भवति कस्यापि निरन्तरमत्र संसारे ॥ १९३ ॥
जायासुतविरहविसंस्थुलस्य यूथाधिपतेर्विन्ध्ये ।
ते सरसपल्लवाः शल्लक्या विषकवलसदृशाः ॥ १९४ ॥
गुरुक्षुधाकुलितस्य च वल्लभाकरिणीसुखं स्मरतः ।
सरसो मृणालकवलो गजस्य हस्त एव विलीनः ॥ १९५ ॥
तथा निःश्वसितं यूथाधिपेन चिरविलसितं स्मरता ।
करगृहीतं तृणकवलं हरितं यथा झटिति प्रज्वलितं ॥ १९६ ॥
विरहप्रदीप्तो रे वरगजेन्द्र मा भञ्जस्व सकलवनराजीः ।
उन्मूलितेऽपि विन्ध्ये विरहावस्था तथैव ॥ १९७ ॥
यूथाद्वनगहनं गहनात्सरः सरसो गिरिशिखरं ।
शिखरेभ्यः पृथिवीं पश्यति हस्ती प्रियाविरहे ॥ १९८ ॥
करिणीकरार्पितनवसरससल्लकीकवलभोजनं दन्ती ।
यदि न म्रियते स्मरंस्तदा किं क्षणोऽपि मा भवतु ॥ १९९ ॥

सीहवज्जा

किं करइ कुरङ्गी बहु-सुएहि ववसायमाणरहिएहिं ।
एक्केण वि गयघडदारणेण सिंही सुहं सुवइ ॥ २०० ॥
जाइविसुद्धाण नमो ताण मइन्दाण अहह जियलोए ।
जे जे कुलम्मि जाया ते ते गयकुम्भनिद्दलणा ॥ २०१ ॥
मा जाणह जह तुङ्गत्तणेण पुरिसाण होइ सोण्डीरं ।
मडहो वि मइन्दो करि-वराण कुम्भत्थलं दलइ ॥ २०२ ॥
बेण्णि वि रसुप्पन्ना बज्झन्ति गया न चेव केसरिणो ।
संभाविज्जइ मरणं न गञ्जणं धीरपुरिसाणं ॥ २०३ ॥

वाहवज्जा

एक्कसरपहरदारिय-माइन्दगइन्दजुज्झमाभिडिए ।
वाहि न लज्जसि नच्चसि दोहग्गे पायडिज्जन्ते ॥ २०४ ॥
कत्तो तं रायघरेसु विलसियं जं घरम्मि वाहस्स ।
गयकुम्भवियारियमोत्तिएहि जं जङ्गलं किणइ ॥ २०५ ॥
अज्ज कयत्थो दियहो वाहवहू रूवजोव्वणुम्मइया ।
सोहग्गं धणुरुम्पच्छलेण रच्छासु विक्खिरइ ॥ २०६ ॥
ओखिप्पइ मण्डलमारुएण गेहङ्गणाउ वाहीए ।
सोहग्गधयवडाइ व्व धणुरओ रुम्परिञ्छोली ॥ २०७ ॥
जह जह वड्ढन्ति थणा तह तह झिज्जन्ति पञ्चवत्थूणि ।
मज्झं पइ कोयण्डं पलिजुवाणा सवत्तीओ ॥ २०८ ॥

सिंहपद्धतिः

किं करोति कुरङ्गी बहुसुतैर्व्यवसायमानरहितैः ।
एकेनापि गजघटदारणेन सिंही सुखं स्वपिति ॥ २०० ॥
जातिविशुद्धेभ्यो नमस्तेभ्यो मृगेन्द्रेभ्योऽत्र जीवलोके ।
ये ये कुले जातास्ते ते गजकुम्भनिर्दलनाः ॥ २०१ ॥
मा जानीत यदि तुङ्गत्वेन पुरुषाणां भवति शौण्डीर्यं ।
लघुरपि मृगेन्द्रः करिवराणां कुम्भस्थलं दारयति ॥ २०२ ॥
उभयेऽप्यरण्योत्पन्ना बध्यन्ते गजा नैव केसरिणः ।
संभाव्यते मरणं न गञ्जनं धीरपुरुषाणां ॥ २०३ ॥

व्याधपद्धतिः

एकशरप्रहारदारितमृगेन्द्रगजेन्द्रयुद्धे प्रवृत्ते ।
व्याधि न लज्जसे नृत्यसि दौर्भाग्ये प्रकटीक्रियमाणे ॥ २०४ ॥
कुतस्तद्राजगृहेषु विलसितं यद्गृहे व्याधस्य ।
गजकुम्भविदारितमौक्तिकैर्यज्जङ्गलं क्रीयते ॥ २०५ ॥
अद्य कृतार्थो दिवसो व्याधवधू रूपयौवनोन्मत्ता ।
सौभाग्यं धनुरुल्लिखनच्छलेन रथ्यासु विकिरति ॥ २०६ ॥
अहो चिय्यते मण्डलीमारुतेन गेहाङ्गणाद्व्याधवध्वाः ।
सौभाग्यध्वजपताकेव धनूरजस्त्वक्पङ्क्तिः ॥ २०७ ॥
यथा यथा वर्धते स्तनौ तथा तथा चीयन्ते पञ्चवस्तूनि ।
मध्यं पतिः कोदण्डं पलियुवानः सपत्न्यः ॥ २०८ ॥

जह जह वड्ढन्ति थणा वियसइ मयणो मवम्महा दिट्ठी ।
तह तह वाइजुवाणो दियहे दियहे धणुल्लिहइ ॥ २०९ ॥
जह जह न चडइ चावो उल्लिसइ करइ पल्लिणाहस्स ।
तह तह सुण्हा विप्फुलगण्डविवरम्मुही हसइ ॥ २१० ॥
दिन्नं थणाण अग्घं करिणीजूहेण वाहवहुयाए ।
रण्डत्तणं न पत्तं हे सुन्दरि तुह पसाएणं ॥ २११ ॥
सिहिपेहुणावयंसा वहुया वाहस्स गव्विरी भमइ ।
गयमुत्तागहियपसाहणाण मज्झे सवत्तीणं ॥ २१२ ॥
वाणियय हत्थिदन्ता कत्तो अम्हाण वग्घकित्तीओ ।
उत्तुङ्गथोरथणवट्टसालसा जं वहू सुवइ ॥ २१३ ॥
वग्घाण नहा सीहाण केसरा मोत्तिया गइन्दाणं ।
कत्तो वाणिय अम्हं मयचम्मपरिग्गहो नत्थि ॥ २१४ ॥

हरिणवज्जा

हरिणा जाणन्ति गुणा रसे वमिऊण गेयमाहप्पं ।
ताणं चिय न त्थि धणं जीयं वाहस्स अप्पन्ति ॥ २१५ ॥
अम्हाण तिणङ्कुरभोयणाण न हु किं पि संचियं दविणं ।
मह मंसपिण्डतुट्ठो जइ वच्चइ ता अहं धन्नो ॥ २१६ ॥
एक्केण वि सरउ सरेण वाह किं बीयएण गहिएण ।
एक्कं पि वसइ जीयं हयास दोहिं पि य सरीरे ॥ २१७ ॥
सरसल्लिएण भणियं कन्थं धुणिऊण जूहहरिणेण ।
गिज्जउ पुणो वि गिज्जउ जाव य कण्ठट्ठिओ जीवो ॥ २१८ ॥

यथा यथा वर्धेते स्तनौ विकसति मदनः समन्मथा दृष्टिः ।
तथा तथा व्याधयुवा दिवसे दिवसे धनुरुल्लिखति ॥ २०९ ॥
यथा यथा न घटति चापो भज्यते करात्पल्लिनाथस्य ।
तथा तथा स्नुषा विस्फारद्गण्डविपराङ्मुखी हसति ॥ २१० ॥
दत्तं स्तनयोरर्घं करिणीयूथेन व्याधवध्वाः ।
एकत्वं न प्राप्तं हे सुन्दरि तव प्रमादेन ॥ २११ ॥
शिखिपिच्छावतंसा वधूर्व्याधस्य गर्वमती भ्राम्यति ।
गजमुक्तागृहीतप्रसाधनानां मध्ये सपत्नीनां ॥ २१२ ॥
वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्त्यः ।
उत्तुङ्गपृथुस्तनपृष्ठसालसा यद्वधूः स्वपिति ॥ २१३ ॥
व्याघ्राणां नखाः सिंहानां केसरा मौक्तिकानि गजेन्द्राणां ।
कुतो वाणिजास्माकं मृगचर्मपरिग्रहो नास्ति ॥ २१४ ॥

हरिणपद्धतिः

हरिणा जानन्ति गुणानरण्य उषिता गेयमाहात्म्यं ।
तेषामेव नास्ति धनं जीवं व्याधस्यार्पयन्ति ॥ २१५ ॥
अस्माकं तृणाङ्कुरभोजनानां न खलु किमपि संचितं द्रविणं ।
मम मांसपिण्डतुष्टो यदि व्रजति तदाहं धन्यः ॥ २१६ ॥
एकेनापि पूर्यतां शरेण व्याध किं द्वितीयेन गृहीतेन ।
एकमपि वसति जीवं हताश द्वयोरपि च शरीरे ॥ २१७ ॥
शरशल्यितेन भणितं स्कन्धं धूत्वा जीर्णहरिणा ।
गीयतां पुनर्गीयतां यावन्न कण्ठस्थितो जीवः ॥ २१८ ॥

घाएण मग्गो सद्देण मई चोज्जेण वाहवज्झया वि ।
अवठम्भिऊण धणुहं वाहेण वि मुक्किया पाणा ॥ २१९ ॥

करहवज्जा

कङ्केल्लिपल्लवो वेल्लमणहरे जइ वि नन्दणे चरइ ।
करहस्स तह वि मरुविलसियाइं हियए खुडुक्कन्ति ॥ २२० ॥
ते गिरिसिहरा ते पीलुपल्लवा ते करीरकसरक्का ।
लब्भन्ति करह मरुविलसियाइं कत्तो वणेत्थम्मि ॥ २२१ ॥
पुणरुत्तपसारियदीहकन्धरो करह किं पलोएसि ।
कत्तो लब्भन्ति मरुत्थलीउ दिव्वे पराहुत्ते ॥ २२२ ॥
दीहुण्हपउरनीसाससोसियासेसपीलुसयसिहरे ।
कवलं पि न गेण्हसि करह मुद्ध किं चक्खियमउव्वं ॥ २२३ ॥
उन्नयकन्धर मा झूर करह ता धरसु किंचि चरिऊण ।
तुह जोग्गा अक्कमरुत्थलीउ तुङ्गा तह कत्तो ॥ २२४ ॥
जं जीहाए विलग्गं किंचि वरं मासि तस्स तं दिट्ठं ।
थुक्केइ चक्खिउं वण-सयाइं करहो धुयग्गीवो ॥ २२५ ॥
अन्नेहिं पि न पत्ता पत्तलकरहेहि करह सा वेल्ली ।
को एसो तुज्झ गहो जं चिन्तसि विज्झसिहराइं ॥ २२६ ॥

मालईवज्जा

तह तुह विरहे मालइ महिमण्डलवन्दणिज्जमयरन्दे ।
परिझीणं भमरउलं जह जायं ससयवन्दं व ॥ २२७ ॥

घातेन मृगो शब्देन मृगयाश्चर्येण व्याधवधूरपि ।
अवष्टभ्य धनुर्व्याधेनापि मुक्ताः प्राणाः ॥ २१९ ॥

करभपद्धतिः

कङ्केल्लिपल्लवो विल्वमनोहरे यद्यपि नन्दने चरति ।
करभस्य तथापि मरुविलसितानि हृदय आविर्भवन्ति ॥ २२० ॥
तानि गिरिशिखराणि ते पिलुपल्लवास्ते करीरकुड्मलाः ।
लभ्यन्ते करभ मरुविलसितानि कुतो वनेऽत्र ॥ २२१ ॥
पुनरुक्तप्रसारितदीर्घकन्धरः करभ किं प्रलोकयसि ।
कुतो लभ्यन्ते मरुस्थल्यो दैवे पराङ्मुखे ॥ २२२ ॥
दीर्घोष्णप्रचुरनिःश्वासशोषिताशेषपीलुशतशिखरे ।
कवलमपि न गृह्णासि करभ मुग्ध किमास्वादितमपूर्वं ॥ २२३ ॥
उन्नतकन्धर मा खिद्यस्व करभ तस्माद्दूरस्व किंचिच्चरित्वा ।
तव योग्या अर्कमरुस्थल्यस्तुङ्गास्तरवः कुतः ॥ २२४ ॥
यज्जिह्वायां विलग्नं किंचिदरं मामि तस्य तद्दृष्टं ।
थूत्करोत्यास्वादयितु वनशतानि करभो धुतग्रीवः ॥ २२५ ॥
अन्यैरपि न प्राप्ता कृशकरभैः करभ सा वल्ली ।
क एष तव ग्रहो यच्चिन्तयसि विन्ध्यशिखराणि ॥ २२६ ॥

मालतीपद्धतिः

तथा तव विरहे मालति महीमण्डलवन्दनीयमकरन्दे ।
परिक्षीणं भ्रमरकुलं यथा जातं मशकवृन्दमिव ॥ २२७ ॥

वड्ढसु मालइकलिए निब्भरमयरन्दपरिमलुग्गारे ।
मुञ्चन्तु छप्पया सेसकुसुमसेवाकिलेसस्स ॥ २१८ ॥
वियसन्तु नाम गन्धुद्धुराउ सेसाउ कुसुमजाईओ ।
इन्दिन्दिरस्स रणरणयकारणं मालई चेव ॥ २१९ ॥
मउलं मालइकलियं महुयर दट्ठूण किं पराहुत्तो ।
एत्तो पसरइ भुवणन्तराइ गन्धो वियम्भन्तो ॥ २२० ॥
मउलत्तियाए किं तुह इमीए किं वा दलेहि तलिणेहिं ।
आमोए महुयर मालईए जाणिहिसि माहप्पं ॥ २२१ ॥
तह वासियं वणं मालईए कुसुमेहि निब्भरं सरए ।
जह इत्थ तत्थ कत्थवि भमरा दुक्खेहि लक्खन्ते ॥ २२२ ॥
का समसीसी सह मालईए सेसाण कुसुमजाईणं ।
जस्स वि गन्धविलित्ता भसला भसलेहि पिज्जन्ति ॥ २२३ ॥
कलियामिसेण उब्भेवि अङ्गुलिं मालईए महमहियं ।
धरउ जु धरणसमत्थो मह एन्तो महुयरजुवाणो ॥ २२४ ॥
पक्खुक्खेवं महसूइखण्डणं भमरभरसमुव्वहणं ।
उय सहइ घरहरन्ती त्ति दुब्बला मालई चेव ॥ २२५ ॥

इन्दिन्दिरवज्जा ।

इन्दिन्दिर छप्पय भसल भमर भमिओ सि काणणं सयलं ।
मालइसरिसं कुसुमं जइ दिट्ठं किं न ता भणसि ॥ २२६ ॥
कत्थ वि दलं न गन्धं कत्थ वि गन्धो न पउरमयरन्दो ।
एक्ककुसुमम्मि महुयर बे तिण्णि गुणा न लब्भन्ति ॥ २२७ ॥

वर्धस्व मालतीकलिके निर्भरमकरन्दपरिमलोद्गारे ।
मुञ्चन्तु षट्पदाः शेषकुसुमसेवाक्रोशात् ॥ २२८ ॥
विकसन्तु नाम गन्धोद्धुराः शेषाः कुसुमजातयः ।
इन्दिन्दिरस्य रणरणककारणं मालत्येव ॥ २२९ ॥
लब्ध्वा मालतीकलिकां मधुकर दृष्ट्वा किं पराङ्मुखः ।
इतः प्रसरति भुवनान्तराणि गन्धो विजृम्भमाणः ॥ २३० ॥
लघुतया किं तवैतस्याः किं पत्रैस्तलिनैः ।
आमोदे मधुकर मालत्या ज्ञास्यसि माहात्म्यं ॥ २३१ ॥
तथा वासितं वनं मालत्याः कुसुमैर्निर्भरं शरदि ।
यथात्र तत्र कुत्रापि भ्रमरा दुःखैर्लच्यन्ते ॥ २३२ ॥
का प्रतिस्पर्धा सह मालत्या शेषाणां कुसुमजातीनां ।
यस्यापि गन्धविलिप्ता भ्रमरा भ्रमरैः पीयन्ते ॥ २३३ ॥
कलिकामिषेणोर्ध्वीकृत्याङ्गुलिं मालत्या कथितं ।
धारयत यो धरणसमर्थो माम् प्रत्यागच्छन्तं मधुकरयुवानं ॥२३४॥
पत्रोत्क्षेपं नखसूचिखण्डनं भ्रमरभरसमुद्वहनं ।
पश्य सहते कम्पमानापि दुर्बला मालत्येव ॥ २३५ ॥

इन्दिन्दिरपद्धतिः ।

इन्दिन्दिर षट्पद भसल भ्रमर भ्रान्तोऽसि काननं सकलं ।
मालतीसदृशं कुसुमं यदि दृष्टं किं न तदा भणसि ॥ २३६ ॥
कुत्रापि दलं न गन्धः कुत्रापि गन्धो न प्रचुरमकरन्दः ।
एककुसुमे मधुकर द्वौ त्रयो गुणा न लभ्यन्ते ॥ २३७ ॥

एक्कं महुयरहियय तं चिय पुण मालईए पडिबद्धं ।
सेसा फुल्लन्तु फलन्तु पायवा को निवारेइ ॥ २३८ ॥
मालइ पुणो वि मालइ हा मालइ मालइ त्ति जम्पन्तो ।
उव्विग्गो भमइ अली हिण्डन्तो सयलवणराई ॥ २३९ ॥
रुणरुणइ वलइ वेल्लइ पक्खउडं धुणइ खिवइ अङ्गाइं ।
मालइकलियाविरहे पच्छावत्थं गओ भमरो ॥ २४० ॥
मालइविरहे रे तरुणभसल मा रुवसु निब्भरुक्कण्ठं ।
वसहविओयदुक्खं मरणेण विणा न वीसरइ ॥ २४१ ॥
जाव न वियसइ सरसा वरइ न ईसं पि मालईकलिया ।
अविणीयमहुयरेहिं ताव च्चिय पाउमारद्धा ॥ २४२ ॥
वियसन्तसरसतामरसभसल वियसेइ मालई जाव ।
ता जत्थ व तत्थ व जह व तह व दियहा गमिज्जन्ति ॥ २४३ ॥
छप्पय गमेसु कालं वासवकुसुमाइ ताव मा मुयसु ।
मन्न जियन्तो पेच्छसि पउरा रिद्धी वसन्तस्स ॥ २४४ ॥
मा इन्दिन्दिर तुङ्गसु पङ्कयदलनिलय मालईविरहे ।
तुम्बिणिकुसमाइ न मं—पडन्ति दिव्वे पराहुत्ते ॥ २४५ ॥
इयरकुसुमेसु महुयर दे बन्ध रइं विमुञ्च रणरणयं ।
झायन्तो च्चिय मरिहिसि कत्तो ते मालई मरए ॥ २४६ ॥
भमरो भमरो त्ति गुणोज्झिएहि कुसुमेहि लाइओ दोसो ।
लहिऊण मालइं पुण सो निउणो भमउ जइ भमइ ॥ २४७ ॥
जेणोसहेण चन्दो सोरिज्जइ पुण्णिमामहिओ ॥ ४८५ ॥

किं विहिणा सुरलोए एक्का वि न पुंसलि त्ति निम्मविया ।
साहीणो जेण ससी न वोलिओ नीलरङ्गम्मि ॥ ४८६ ॥

पसरइ जेण तमोहो फिट्टइ चन्दस्स चन्दिमा जेण ।
तं सिद्ध सुमरि सिरिप — व्वयाउ आणेसहं किं पि ॥ ४८७ ॥

मा पत्तियं पि दिज्जसु पुंसलि सिविणे वि कामडहणस्स ।
जो अम्हाण असित्तं चन्दं सीसे समुव्वहइ ॥ ४८८ ॥

असईणं विप्पिय रे गव्वं मा वहसु पुण्णिमायन्द ।
दोसिहिसि तुमं कइया जह भग्गो वलयखण्डो व्व ॥ ४८९ ॥

अव्वो धावसु तुरियं कज्जल भरिऊण बे वि हत्थाइं ।
दिट्ठो कूवापडिओ असईणं दूहओ चन्दो ॥ ४९० ॥

यो यत्करोति प्राप्नोति स तत्कृत्वा निर्गतासती।
रमितव्यं तेन समं तत्र यदृच्छया तत दूतानी ॥ ४८० ॥
असतीभिः सती भणिता निभृतं भूत्वा कर्णमूले।
नरकं व्रजसि पापे परपुरुषरसमजानाना ॥ ४८१ ॥
यत्र न कुञ्जविटपो न नदी न वनं नोद्दमं गेहं।
तत्र भण कथमुष्यते पुंश्चलविवर्जिते ग्रामे ॥ ४८२ ॥
रे रे राहो मा मुञ्च दुर्जनं गिल पूर्णिमाचन्द्रं।
अमृतमयं भुञ्जस्तताश दीर्घायुर्भविष्यसि ॥ ४८३ ॥
छिन्नं पुनोऽपि छिद्यतां मधुमथनचक्रेण राहोः शिरः।
गिलितो येनापि मुक्तो ऽसतीनां दूषकश्चन्द्रः। ४८४ ॥
तत्किमपि कथमपि भविष्यति लभ्यते पृथ्वीमपि हिण्डमानैः।
येनौषधेन चन्द्रो जीर्यते पूर्णिमासहितः॥ ४८५ ॥
किं विधिना सुरलोके एकापि न पुंश्चली निर्मिता।
स्वाधीनो यया शशी न निमज्जितो नीलरङ्गे ॥ ४८६ ॥
प्रसरति येन तमश्चोघो भ्रंशते चन्द्रस्य चन्द्रिकायेन।
तत्सिद्ध स्मृत्वा श्रीपर्वतादानयौषध किमपि ॥ ४८७ ॥
मा पत्त्रिकामपि दद्याः पुंश्चलि स्वप्नेऽपि कामदहनस्य।
योऽस्माकममित्रं चन्द्रं शिरसि समुद्वहति। ४८८ ॥
असतीनां विप्रिय रे गर्वं मा वहस्व पूर्णिमाचन्द्र।
द्रक्ष्यसे त्वं कदापि यथा भग्नो वलयखण्ड इव ॥ ४८९ ॥
अहो धाव त्वरितं कज्जलेन भृत्वा द्वावपि हस्तौ।
दृष्टा कूपपतितोऽसतीनां दूषकश्चन्द्रः। ४९० ॥

मङ्गएहि कीस पन्थिय जइ हरसि नियंसणं नियम्बाओ ।
साहेमि कस्स पुरओ गामो दूरे अहं एक्का ॥ ४९१ ॥

अत्ता बहिरन्धलिया बहुविहवीवाहसङ्कुलो गामो ।
मज्झ पई य विएसे को तुज्झ वासरियं देइ ॥ ४९२ ॥

जणसङ्कुलं न सुन्नं रूसइ अत्ता न देइ ओवासं ।
ता वच्च पहिय मा म—ग्ग वासयं एत्थ मज्झ हरे ॥ ४९३ ॥

कह लब्भइ सत्थरयं अम्हाण य पहिय पामरघरम्मि ।
उन्नयपओहरे पे—च्छिऊण जइ वससि ता वससु ॥ ४९४ ॥

वस पहिय अङ्गण च्चिय फिट्टउ ता तुज्झ वसणदोहलओ ।
इह गामे हेमन्तो नवरं गिम्हस्स सारिच्छो । ४९५ ॥

इत्तो निवसइ अत्ता एत्थ अहं एत्थ परियणो सयलो ।
ए पहिय रत्तियन्धय मा मह सयणे निमज्जिहिसि ॥४९६॥

जोइसियवज्जा ।

दोहरखडियाहत्थो जोइसिओ भमइ नयरमज्झम्मि ।
जाणइ सुक्कस्स गइं गणइ जइ गणावए को वि ॥ ४९७ ॥

जोइसिय मा विलम्बसु खडियं घेत्तूण गणसु मह तुरियं ।
अङ्गारए पणट्ठे सुक्कस्स गई तह च्चेय ॥ ४९८ ॥

अत्थि घर च्चिय गणओ विचित्तकरणेहि निट्ठुरं गणइ ।
न हु जाणइ सुक्कगइं तेणाहं तुह घरे पत्ता ॥ ४९९ ॥

जोइसिय कीस चुक्कसि विवित्तकरणाइ जाणमाणो वि ।
तह कहवि कुणसु सिग्घं जह सुक्कं निच्चलं होइ ॥ ५०० ॥

मधूकैः किं पथिक यदि हरसि निवसनं नितम्बात् ।
कथयामि कस्य पुरतो ग्रामो दूरेऽहमेका ॥ ४८१ ॥
श्वश्रूर्बधिरान्धा बहुविधविवाहसंकुलो ग्रामः ।
मम पतिश्च विदेशे को तव वासं ददाति ॥ ४८२ ॥
जनसंकुलं न शून्यं इच्छति श्वश्रूर्न ददात्यवकाशं ।
ततो व्रज पथिक मा मार्गय वासकमत्र मम गृहे ॥ ४८३ ॥
कथं लभ्यते स्रस्तरकं (स्वस्थरतं) अस्माकं पथिक पामरगृहे ।
उन्नतपयोधरान् (मेघान्-स्तनौ) दृष्ट्वा यदि वससि तदा वस ॥ ४८४ ॥
वस पथिकाङ्गण एव भ्रश्यतु ततस्तव वसनदोहदः ।
अत्र ग्रामे हेमन्तो नवरं ग्रीष्मस्य सदृशः ॥ ४८५ ॥
इतो निवसति श्वश्रूरत्राहमत्र परिजनः सकलः ।
हे पथिक राज्यन्ध मा मम शयने निमंक्ष्यसे ॥ ४८६ ॥

ज्यौतिषिक-पद्धति ।

दीर्घखटिकाहस्तो (दीर्घसेफहस्तो) ज्यौतिषिको भ्राम्यति नगरमध्ये ।
जानाति शुक्रस्य गतिं (वीर्यस्य स्तम्भनं) गणयति (यभति)
यदि प्रतिपादयति (याभयति) कोऽपि (कापि) ॥ ४८७ ॥
ज्यौतिषिक मा विलम्बस्व खटिकां गृहीत्वा गणय मम त्वरितं ।
अङ्गारके (अङ्करते) प्रनष्टे शुक्रस्य गतिस्तथैव ॥ ४८८ ॥
अस्ति गृह एव गणको विचित्रकरणैर्निष्ठुरं गणयति ।
न खलु जानाति शुक्रगतिं तेनाहं तव गृहे प्राप्ता ॥ ४८९ ॥
ज्यौतिषिक किं भ्रमसि विचित्रकरणानि जानन्नपि ।
तथा कुरु कथमपि शीघ्रं यथा शुक्रो निश्चलो भवति ॥ ५०० ॥

विवरीए रइबिम्बे नखक्खत्ताणं च ठाणगहियाणं।
न पडइ जलस्स बिन्दू सुन्दरि चित्तट्टिए सुक्के ॥ ५०१ ॥

विउलं फलयं थोरा सलायया तं पि णय कुसलो सि।
तहवि न आओ सुक्को सच्चं चिय सुन्नहियओ सि ॥ ५०२ ॥

उज्झउ सो जोइसिओ विचित्तकरणाइ जाणमाणो वि।
गणिउं सयवारं मे उट्ठइ धूमो गयणम्मि ॥ ५०३ ॥

जइ गणसि पुणो वि तुमं विचित्तकरणेहि गणय सविसेसं।
सुक्कक्कमेण रहियं न हु लग्गं सोहणं होइ ॥ ५०४ ॥

मोत्तूण करणगणियं अङ्गुलिमेत्तेण जइ वि सो गणइ।
अइनिउणो जोइसिओ कड्ढइ नाडीगयं सुक्कं ॥ ५०५ ॥

भणिओ वि जइ न कुप्पसि जइ न तुमं होसि कूडजोइसिओ।
ता कीस तुज्झ जाया गणइ जइ गणावए को वि ॥ ५०६ ॥

अङ्गारयं न याणसि न हु बुज्झसि हत्थचित्तसंचारं।
इय माइ कूडगणओ कह जाणइ सुक्कसंचारं ॥ ५०७ ॥

लेहयवज्जा।

मसि मलिऊण न-याणसि लेहणि गहिऊण मूढ खलिओ सि।
ओसरसु कूडलेहय सुललियपत्तं विणासिहिसि ॥ ५०८ ॥

विपरीते रविबिम्बे (रतिबिम्बे) नक्षत्राणां (नखक्षतानां) च
स्थानगृहीतानां ।
न पतति जलस्य (बीजस्य) बिन्दुः सुन्दरि चित्रास्थे (चित्तस्थे)
शुक्रे ॥ ५०१ ॥
विपुलं फलकं (रतिमन्दिरं) दीर्घा शलाका (दीर्घः प्रजापतिः)
त्वमपि गणक कुशलोऽसि (शभने प्रवीणोऽसि) ।
तथापि नागतः शुकः सत्यमेव शून्यहृदयोऽसि ॥ ५०२ ॥
दृष्टतं स ज्योतिषिको विचित्रकरणानि जानानोऽपि ।
गणयित्वा शतवारं ममोत्तिष्ठति धूमो गणयतः ॥ ५०३ ॥
यदि गणयसि पुनरपि त्वं विचित्रकरणैर्गणय सविशेषं ।
शुक्रक्रमेण रहितं न खलु लग्नं शोभनं भवति ॥ ५०४ ॥
मुक्त्वा करणगणितमङ्गुलिमात्रेण यदि सोऽपि गणयति ।
अतिनिपुणो ज्योतिषिकः कर्षति नाडीगतं शुक्रं ॥ ५०५ ॥
भणितोऽपि यदि न कुप्यसि यदि न त्वं भवसि कूटज्योतिषिकः ।
ततः किं तव जाया गणयति यदि प्रतिपादयति कोऽपि ॥ ५०६ ॥
अङ्गारकं (अङ्गरतं) न जानासि न खलु बुध्यसि हस्तचित्रासंचारं
(हस्तचित्तसंचारं)
इति मातः कूटगणकः कथं जानाति शुक्रसंचारं
(बीजस्तम्भनं) ॥ ५०७ ॥

लेखक पद्धतिः ।

मसीं (वीर्यं) मर्दितुं न जानासि लेखनीं (शेफं) ग्रहीतुं
मूढ स्खलितोऽसि ।
अपसर कूटलेखक सुललितपत्रं (शय्याप्रच्छादनपटं)
विनाशयिष्यसि ॥ ५०८ ॥

ढलिया य मसी भग्गा य लेहणी खरडियं च तलवट्टं ।
धिद्धि त्ति कूडलेहय अज्ज वि लेहत्तणं तण्हा ॥ ५०९ ॥

पिङ्गलं मसिभायणयं अत्थि मसी वित्थरं च तलवट्टं ।
अन्हारिसाण कज्जे हयलेहय लेहणी भग्गा ॥ ५१० ॥

विज्जवज्जा ।

विज्ज न एसो जरओ न य वाही एस को वि संभूओ ।
उवसमइ सलोणेणं विडङ्गजोयामयरसेणं ॥ ५११ ॥

सच्चं जरए कुसलो सरसुप्पन्ना य लक्खसे वाही ।
एयं पुणो वि अङ्गं विज्ज विडङ्गेहि पन्नत्तं ॥ ५१२ ॥

पुक्कारयं पउञ्जसु बालाए रसुब्भवाए वाहीए ।
अज्ज अणज्ज निसा — ज्ज विज्ज पेज्जाए न ऊ कज्जं ॥ ५१३ ॥

सासा खासा न सहे — इ सहणं विज्ज किं वियप्पेणं ।
अग्गङ्गुलीए दिज्जउ अवलेहो माउलिङ्गस्स

(माउ लिङ्गस्स) ॥ ५१४ ॥

पुक्कारएण विज्जय निव्विसा तुह य दोहमासेण ।
मा वारिज्जउ बाला भुञ्जउ अन्नं जहिच्छाए ॥ ५१५ ॥

गहवइसुएण भणियं अउव्वविज्जत्तणं हयासेणं ।
जेण पउञ्जइ पुक्का — रयं पि पन्नत्तियाण पि ॥ ५१६ ॥

विज्ज तुहागमण च्चिय मुक्का जरएण किं न परिमुणसि ।
ता नियसु मज्झ अङ्गं संपइ सेओ समुप्पन्नो ॥ ५१७ ॥

विज्जय अन्नं वारं सह जरओ सयरएण पन्नत्तो ।
जइ तं नेच्छसि दाउं ता किं कासी वि मा होउ ॥ ५१८ ॥

खलिता च मसी (वौर्यं) भग्ना च लेखनी (ग्रेफो] भग्नं च
तालपत्त्र (ग्रय्याप्रच्छादनपटं) ।
धिग्धिगिति कूटलेखकाद्यापि लेखने (यभने) तृष्णा ॥ ५०९ ॥
पृथुलं मसीभाजनमस्ति मसी विस्तरं च तालपत्त्रं ।
अस्मादृशीनां कार्यं हतलेखक लेखनी भग्ना ॥ ५१० ॥

वैद्य-पद्धतिः ।

वैद्य नैष ज्वरो न च व्याधिरेष कोऽपि सम्भूतः ।
उपशाम्यति सलवणेन विडङ्गयोगामृतरसेन ॥ ५११ ॥
सत्यं ज्वरे कुशलः सरसोत्पन्नं च लचसे व्याधिं ।
इदं पुनरप्यङ्ग वैद्य विडङ्गैः प्रशमं ॥ ५१२ ॥
पुक्कारयं (पुंस्कारकं) प्रयुङ्क्ष्व बालाया रसोद्भवायाः व्याधेः ।
अद्यानार्य निर्लज्ज वैद्य पेयया (प्रेयसा) न खलु कार्यं ॥५१३॥
श्यामा खामा न सहते मर्दनं वैद्य किं विकल्पेन ।
अद्याङ्गुल्या दीयतामवलेहो मातुलिङ्गस्य (मातर्लिङ्गस्य) ॥५१४॥
पुक्कारयेण वैद्य निर्विशा तव च दीर्घश्वासेन ।
मा वार्यतां बाला भुङ्क्तामन्नं (अन्यं विटं) यथेच्छया ॥ ५१५ ॥
गृहपतिसुतेन भणितमपूर्ववैद्यकं हताशेन
येन प्रयुङ्क्ते पुक्कारयं (फूत्काररतं) अपि (प्राणानामपि) ॥५१६॥
वैद्य तवागमन एव मुक्ता ज्वरेण किं न जानासि ।
ततः पश्य मदङ्गे सम्प्रति खेदः समुत्पन्नः ॥ ५१७ ॥
वैद्यान्यं वारं मम ज्वर औषधेन (शतरतेन) प्रशमः ।
यदि त्वं नेच्छसि दातुं तदा किं तक्रमपि (षडशीतिरपि)
मा भूत् ॥ ५१८ ॥

बालं जराविलङ्गि कलमङ्करपलाविणिं नियन्तस्स ।
विज्जस्स सुसुग्रो सु–सुग्रो वि महसत्ति पब्भट्ठो ॥ ५१८ ॥

मोत्तूण बालतन्तं तह य वसीकरणमन्ततन्तेहिं ।
सिद्धत्थेहि महग्घइ तरुणी तरुणेण विज्जेण ॥ ५२० ॥

अन्नं न रुच्चइ च्चिय मज्झ पियामाए पूरियं हिययं ।
नेहसुरयम्मयङ्गे तुह सुरयं विज्ज पडिहाइ ॥ ५२१ ॥

धम्मियवज्जा ।

जो धम्मिग्रो न पावइ कुरयं मन्दारयं च मुग्गरयं ।
सो गहियकरण्डो च्चिय कत्तो धुत्तीरयं लहइ ॥ ५२० ॥

धुत्तीरएण धम्मिय जइ इच्छसि लिङ्गपूरणं काउं ।
ता एज्जसु मज्झ परो–हडम्मि सूरम्मि अत्थमिए ॥ ५२३ ॥

धुत्तीरयस्स कज्जे गहिराणि परोहडाइ वच्चन्तो ।
धम्मिय सुरङ्गकाश्रो कुरयाण वि नवरि चुक्किहिसि ॥५२४॥

धुत्तीरयाण कज्जे ण धम्मिओ परपरोहडे भमइ ।
अन्नेहि विलुप्पन्तं निययारामं न लक्खेइ ॥ ५२५ ॥

घेत्तूण करण्डं भम–इ वावडो परपरोहडे नूणं ।
धुत्तीरएसु रत्तो एक्का वि न मेलए धम्मो ॥ ५२६ ॥

बालां ज्वराविलाङ्गीं कलमधुरप्रलापिनीं पश्यतः ।
वैद्यस्य सुश्रुतः सुश्रुतोऽपि झटिति प्रनष्टः ॥ ५१९ ॥

मुक्त्वा बालतन्त्रं तथा च वशीकरणमन्त्रतन्त्रैः ।
सिद्धार्थैर्मदस्मर तरुणी तरुणेन वैद्येन ॥ ५२० ॥

(अन्यं) अन्नं न रोचत एव मम प्रियाशया पूरितं हृदयं ।
स्नेहसुरतार्द्राङ्गि तव सुरतं वैद्य प्रतिभाति ॥ ५२१ ॥

धार्मिक-पद्धतिः ।

यो धार्मिको न प्राप्नोति कुरवकं (कुरतं) मन्दारकं (मन्दारतं)
च मुद्गरकं (मुग्धारतं) ।
स गृहीतकरण्ड एव (करगृहीतसाधने) कुतो धत्तूरकं
(धूर्तारतं) लभते ॥ ५२२ ॥

धत्तूरकेन (धूर्तारतेन) धार्मिक यदीच्छसीश्वरपूरणं (शेफ०) कर्तुं ।
तत आगच्छेर्मम गृहपश्चाद्भागे सूर्येऽस्तमिते ॥ ५२३ ॥

धत्तूरकस्य कार्ये (धूर्तारतस्य) गभीरान् गृहपश्चाद्भागान्व्रजन् ।
धार्मिक सुरङ्गात् (सुरतकार्ये) कुरवकेभ्योऽपि (कुरतेभ्यो)
केवलं भ्रंशिष्यसि ॥ ५२४ ॥

धत्तूरकाणां (धूर्तारतानां) कार्येण धार्मिको परगृहपश्चाद्भागा-
न्भ्रमति ।
अन्यैर्विलुप्यमानं (रम्यमाणां) निजारामं (आत्मनो जायां)
न लक्षयति ॥ ५२५ ॥

गृहीत्वा करण्डं भ्राम्यति व्यापृतः परगृहपश्चाद्भागे नूनं ।
धत्तूरकेषु (धूर्तारतेषु) रक्त एकमपि (एकामपि) न मुञ्चति
धर्मी ॥ ५२६ ॥

सुलहाइ परोहडसं – ठियाइ धुत्तीरयाइ मोत्तूणं ।
कुरयाण कए रणं पेच्छह कह धम्मिओ भमइ ॥ ५२७ ॥

कञ्चीरएहि कणवी – रएहि धुत्तीरएहि बउएहिं ।
जइ दुक्कमि देहरयं धम्मिय ता मह घरे एज्ज ॥ ५२८॥

मन्दारयं वितज्जइ कुरयं परिहरइ चयइ भङ्गरयं ।
धुत्तीरयमलहन्तो गहियकरण्डो गणो भमइ ॥ ५२९ ॥

वियसियमुहाइ बहु – ज्जलाइ मयरन्दपायडिल्लाइं ।
धुत्तीरयाइ धम्मिय पुण्णेहि विणा न लब्भन्ति ॥ ५३० ॥

एक्केण वि जइ धुत्ती – रएण लिङ्गस्स उवरि लग्गेण ।
मन्दारयाण धम्मिय कोडीए न तं सुहं होइ ॥ ५३१ ॥

सिसिरमयरन्दपज्झर – णपउरपसरन्तपरिमलुल्लाइं ।
कणवीरयाइ गेण्हसु धम्मिय सब्भावरत्ताइं ॥ ५३२ ॥

जन्तियवज्जा ।

जन्तिय गुलं विमग्गमि न य मे दुच्छाए वाहसे जन्तं ।
अरसन्न किं न याणसि न रसेण विणा गुलं
होइ ॥ ५३३ ॥

सुलभान् गृहपश्चाद्भागसंस्थितान्धत्तूरकान् (धूर्तारतानि) मुक्त्वा ।
कुरवकाणां (कुरतानां) कृतेऽरण्यं पश्यत कथं धार्मिको भ्रमति ॥५२७॥
कञ्चीरएहि (काञ्चीरतैः) करवीरकैः (कन्यारतैः) धत्तूरकैः
(धूर्तारतैः) बहुभिः ।
यदीच्छसि देवगृहं (देहरतं) धार्मिक तदा मम
गृहमागच्छेः ॥ ५२८ ॥
मन्दारकं (मन्दारतं) विवर्जयति कुरवकं (कुरतं) परिहरति
त्यजति भृङ्गारकं (भङ्गरतं) ।
धत्तूरकमलभमानो (धूर्तारतं) गृहीतकरण्डो (करगृहीतसाधनो)
गणो भ्रमति ॥ ५२९ ॥
विकसितमुखानि (विहसित०) वर्णोज्ज्वलानि मकरन्दप्रकटानि ।
धत्तूरककुसुमानि (धूर्तारतानि) धार्मिक पुण्यैर्विना न
लभ्यन्ते ॥ ५३० ॥
एकेनापि यथा धत्तूरकेन (धूर्तारतेन) लिङ्गस्योपरि लग्नेन
(साधनस्पृष्टेन) ।
मन्दारकाणां (मन्दारतानां) धार्मिक कोट्या न तत्सुखं भवति ॥५३१॥
शिशिरमकरन्दप्रसरणप्रचुरभ्रमरत्परिमलार्द्राणि ।
करवीराणि (कन्यकारतानि) गृहाण धार्मिक
सद्भावरक्तानि ॥ ५३२ ॥

यान्त्रिक-पद्धतिः ।

यान्त्रिक (मैथुनकर्तर्) गुलं (द्रवीकरणत्वं) विमार्गयसे न च
ममेच्छया वहसे यन्त्रं (मैथुनं) ।
अरसज्ञ किं न जानासि न रसेन (शोभनमैथुनेन) विना गुलो
भवति । ५३३ ॥

वियडा वि जन्तवाया मउओ नालो रसाउलो उच्छू ।
लट्ठो वि सुप्पमाणा किं जन्तिय ऊणयं वहसि ॥ ५३४ ॥
महालयं सरूवं वित्थिण्णं वररसं सुमहमहं ।
जं एरिसयं जन्तं तत्थ सुहं जन्तिओ लहइ ॥ ५३५ ॥
तह जन्तिएण जन्तं अक्कन्तं नेहनिब्भररसेण ।
जह पढमं चिय कुण्डी भरिया एक्केण घाएण ॥ ५३६ ॥
तं जन्तं सा कुण्डी सो उच्छू वहलपत्तलच्छाओ ।
पीलावय तुज्झ गुणो अज्ज वि ऊणो रसो जाओ ॥ ५३७ ॥

मुसलवज्जा ।

चन्दणवलियं दिढक – च्छिबन्धणं दीहरं सुपरिमाणं ।
होइ घरे साहीणं मुसलं धन्नाण महिलाणं ॥ ५३८ ॥
थोरगरुयाइ सुन्दरि कच्छोजुत्ताइ हुन्ति नियगेहे ।
धन्नाण महिलियाणं उक्खलसरिसाइ मुसलाइं ॥ ५३९ ॥
मुहभारियाइ सुट्ठु वि सुट्ठु वि कच्छोए दिढनिबद्धाइं ।
अन्नाहि पि हु जस्स – क्खलम्मि भज्जन्ति मुसलाइं ॥ ५४० ॥
भमिओ चिरं असेसो गामो मइ महियओ सयंवारं ।
गेहुक्खलपरिमाणे – ण मामि मुसलं चिय न दिट्ठं ॥ ५४१ ॥
भद्दमुहमण्डण चिय दरपिहुलं तह य कच्छिसोहिल्लं ।
अन्नेहिं पिय मुसलं पडिछन्दं तेण वच्चामो ॥ ५४२ ॥

बालासंवरणवज्जा ।

जस्स तुमं अणुरत्ता सो तुज्झ य मन्दनेहओ पुत्ति ।
न हु दिज्जइ ताली दो – हत्थि एक्केण हत्थेण ॥ ५४३ ॥

विकटा अपि यन्त्रपाटा मृदुको नालो रसाकुल इक्षुः।
यष्टिरपि सुप्रमाणा किं यन्त्रिकोनकं वहसि ॥ ५ ३ ४ ॥

शब्दालयं सरूपं विस्तीर्णं वररसं सुमर्दसहं।
यदीदृशं यन्त्रं तत्र सुखं यान्त्रिको लभते ॥ ५ ३ ५ ॥

तथा यान्त्रिकेण यन्त्रमाक्रान्तं स्नेहनिर्भररसेन।
यथा प्रथममेव कुण्डी भृतैकेन घातेन ॥ ५ ३ ६ ॥

तद्यन्त्रं सा कुण्डी स इक्षुर्बहलपत्रच्छायः।
यान्त्रिक तव गुणोऽद्याप्यूनो रसो जातः ॥ ५ ३ ७ ॥

मुसल-पद्धतिः।

चन्दनवलितं दृढकाञ्चीबन्धनं दीर्घं सुपरिमाणं।
भवति घरे स्वाधीनं मुसलं धन्यानां महिलानां ॥ ५ ३ ८ ॥

स्थूलदीर्घाणि सुन्दरि काञ्चीयुक्तानि भवन्ति निजगेहे।
धन्यानां महिलानामुदूखलसदृशानि मुसलानि ॥ ५ ३ ९ ॥

मुखभृतानि सुष्ठ्वपि सुष्ठ्वपि काञ्च्या दृढनिबद्धानि।
अन्याभिरपि खलु जीर्णोदूखले भज्यन्ते मुसलानि ॥ ५ ४ ० ॥

भ्रान्तश्चिरमशेषो ग्रामो मया सख्यः शतवारान्।
गेहोदूखलपरिमाणेन मासि मुसलमेव न दृष्टं ॥ ५ ४ १ ॥

भद्रमुखमण्डनमेवेषत्पृथुलं तथा च काञ्चिशोभितं।
अन्येषामेव मुसलं प्रतिच्छन्दं तेन व्रजामः ॥ ५ ४ २ ॥

बालासंवरण-पद्धतिः।

यस्य त्वमनुरक्ता स त्वयि च मन्दस्नेहः पुत्रि।
न खलु दीयते तालिका दीर्घाच्येकेन हस्तेन ॥ ५ ४ ३ ॥

जत्थ गओ तत्थ गओ सामलि सीहो न जुप्पइ हलम्मि ।
सप्पुरिसो वि तह च्चिय पुंससु नयणाइ मा रुयसु ॥ ५४४ ॥

तइया वारिज्जन्तो पियहि पइं उल्लिरीहि अच्छीहिं ।
एण्हिं विरहावत्था पुणो वहन्तो किलामिहिसि ॥ ५४५ ॥

मा रुवसु पुत्ति छेया – ण अग्गए खिज्जिहिन्ति नयणाइं ।
न हु झिज्जइ ताण मणं सेलं मिव सलिलपूरेण ॥ ५४६ ॥

दाणं न देन्ति बहुलं नेहं दरिसन्ति नेय हरिसन्ति ।
गेण्हन्ति न देन्ति मणं पुत्ति छेया दुराराहा ॥ ५४७ ॥

रच्चन्ति नेय कस्स वि रत्ता पसयच्छि न हु विरच्चन्ति ।
दिणयरकर व्व छेया अदिट्ठदोसा वि रच्चन्ति ॥ ५४८ ॥

रच्चावन्ति न रच्चहि हरन्ति हिययं न देन्ति नियहिययं ।
छेया भुयङ्गसरिसा डसिऊण परम्मुहा होन्ति ॥ ५४९ ॥

रच्चावन्ति न रच्चहि देन्ति असोक्खं न दुक्खिया हुन्ति ।
असुयविणय त्ति एण्हिं दुक्खाराहा जए छेया ॥ ५५० ॥

रत्ते रत्ता कसण – म्मि कसणया धवलयम्मि तह धवला ।
फलिहमणि व्व छइल्ला हुन्ति जणे पुत्ति संपुण्णा ॥ ५५१ ॥

कुट्टिणीसिक्खावज्जा ।

दरहसियकडक्खनिरि – क्खणाइ सिङ्गारकम्मभणियाइं ।
एयाइ पुणो सिक्खसु निहुवणसोहग्गदइयाइं ॥ ५५२ ॥

मग्गन्तो मूलियमू – लियाइ मा भमसु घरहरं पुत्ति ।
छन्दाणुवत्तणं पिय – यमस्स एयं वसीकरणं ॥ ५५३ ॥

यत्र गतस्तत्र गतः श्यामले सिंहो न युज्यते हले।
सत्पुरुषोऽपि तथैव प्रोञ्छ नयने मा रुद्यतां ॥ ५४४ ॥
तदा वार्यमाणा पिब पतिमार्द्राभ्यामक्षिभ्यां।
इदानीं विरहावस्थां पुनर्वहमाना क्लमिष्यसि ॥ ५४५ ॥
मा रोदीः पुत्रि छेकानामग्रे खेद्येते नयने।
न खलु क्षीयते तेषां मनः शैल इव सलिलपूरेण ॥ ५४६ ॥
दानं न ददति बहुलं स्नेहं दर्शयन्ति न च हर्षन्ते।
गृह्णन्ति न ददति मनः पुत्रि छेका दुराराधाः ॥ ५४७ ॥
रज्यन्ते नैव कस्मिन्नपि रक्ताः प्रसृताक्षि न खलु विरज्यन्ते।
दिनकरकरा इव छेका अदृष्टदोषा अपि रज्यन्ते ॥ ५४८ ॥
रञ्जयन्ति न रज्यन्ते हरन्ति हृदयं न ददति निजहृदयं।
छेका भुजङ्गसदृशा दृष्ट्वा पराङ्मुखा भवन्ति ॥ ५४९ ॥
रञ्जयन्ति न रज्यन्ते ददत्यसौख्यं न दुःखिता भवन्ति।
अश्रुतविनया इतीदानीं दुःखाराध्या जगति छेकाः ॥ ५५० ॥
रक्ते रक्ताः कृष्णे कृष्णा धवले तथा धवलाः ॥
स्फटिकमणिरिव छेका भवन्ति जने पुत्रि संपूर्णाः ॥ ५५१ ॥

कुट्टिनीशिक्षा-पद्धतिः।

ईषद्धसितकटाक्षनिरीक्षणानि शृङ्गारकर्ममर्मस्थानानि।
एतानि पुनः शिक्षय निरुपमसौभाग्यदयितानि ॥ ५५२ ॥
मार्गयमाणा मूलिका मूलिका मा भ्रम गृहं गृहं पुत्रि।
छन्दानुवर्तनं प्रियतमस्यैतद्वशीकरणं ॥ ५५३ ॥

भूसणपसाहणाड — म्बरेहिं मा खिवसु पुत्ति अप्पाणं ।
रज्जिज्जइ जेण जणो अन्ने च्चिय ते अलङ्कारा ॥ ५५४ ॥

अन्नासत्ते वि पिए अहिययरं आयरं कुणिज्जासु ।
उव्वुच्छिइ वेयणाइ वि न मन्ति चरियाइ त्ति गुणेहिं ॥ ५५५ ॥

न विणा सब्भावेणं घेप्पइ परमत्थजाणओ लोओ ।
को जुण्णमज्जरं क — ञ्जिएण वेयारिउं तरइ ॥ ५५६ ॥

जेण विणा न वलिज्जइ अणुणिज्जइ सो कयावराहो वि ।
पत्ते वि नयरदाहे भण कस्स न वल्लहो अग्गी ॥ ५५७ ॥

अव्वो जाणामि अहं तुम्ह पसाएण चाडुयसयाइ ।
एक्कं नवरि न जाणे निन्नेह रमणपज्जरणं ॥ ५५८ ॥

ताव च्चिय ढलहलया जाव च्चिय नेहपूरियसरीरा ।
सिद्धत्था उण वेया नेहविहूणा खलीहुन्ति ॥ ५५९ ॥

वेसावज्जा ।

अहिणि व्व कुडिलगमणा रोरहरे दीवअ व्व निन्नेहा ।
सुकवि व्व अत्थलुद्धा वेसं दट्ठूण वन्दामि ॥ ५६० ॥

वलग्गा मुहरसिया नेहविहूणा वि लग्गए कण्ठं ।
पच्छा करइ वियारं वलहट्टयमारिसा वेसा ॥ ५६१ ॥

महइ सलोहा घणघा — यताडणं तह य ताणसंबन्धं ।
कुण्ठि व्व पउरकुडिला वेसा मुट्ठीए मरहट्ठ ॥ ५६२ ॥

जाओ पियं पियं पइ एक्कं विज्झाइ तं चिय पलित्तं ।
होइ अवरत्थिओ च्चिय वेसासत्थो निणग्गि व्व ॥ ५६३ ॥

भूषणप्रसाधनाडम्बरैर्मा चिप पुत्र्यात्मानं।
रज्यते येन जनो ऽन्य एव ते ऽलङ्काराः ॥ ५५४ ॥
अन्यासक्ते ऽपि प्रिये ऽधिकतरमादरं कुर्वीथाः।
ऊर्ध्वाचि वेदना अपि न मन्त्रिचरिता अपि गुणैः ॥ ५५५ ॥
न विना सद्भावेन गृह्यते परमार्थं जानानो लोकः।
को जीर्णमार्जारं काञ्जिकेन प्रतारयितुं तरति ॥ ५५६ ॥
येन विना न स्थीयते ऽनुनीयते स कृतापराधोऽपि।
प्राप्तेऽपि नगरदाहे भण कस्य न वल्लभोऽग्निः ॥ ५५७ ॥
अहो जानाम्यहं युष्मत्प्रसादेन चाटुशतानि।
एकं केवलं न जाने निःस्नेहे रमणप्रचरणं ॥ ५५८ ॥
तावदेव मृदुका यावदेव स्नेहपूरितशरीराः (तैल०)।
सिद्धार्थाः पुनश्चैकाः (सर्षपाः) स्नेहविहीना खलीभवन्ति ॥ ५५९ ॥

वेश्या—पद्धतिः।

अहिरिव कुटिलगमना दरिद्रगृहे दीपक इव निःस्नेहा।
सुकविरिवार्थलुब्धा वेश्यां दृष्ट्वा वन्दे ॥ ५६० ॥
वर्णाढ्या मुखरमिका स्नेहविहीनापि लगति कण्ठे।
पश्चात्करोति विकारं चणकरोटिकासदृशा वेश्या ॥ ५६१ ॥
सहते सलोभा (सलोहा) घनघाततांडनं तथा च पाणसंबन्धं।
संदंशिकेव प्रचुरकुटिला वेश्या मुग्धा समुह्यते ॥ ५६२ ॥
यातः प्रिय प्रियं प्रति (पदं पदं प्रति) एकं निर्वाति तदेव प्रदीप्तं।
भवत्यपरस्थित एव वेश्यामार्गस्तृणाग्निरिव ॥ ५६३ ॥

निम्मलपवित्तहारा बहुलोहा पुलइएण अङ्गेण ।
खग्गलइय व्व वेसा कोसेण विणा न संवहइ ॥ ५६४ ॥
घणसंचया सुगुज्झा निबद्धलोहा भुयङ्गमहणिज्जा ।
मञ्जूसिय व्व वेसा ठाणं चिय लोहचित्तस्स ॥ ५६५ ॥
न गणेइ रूववन्तं न कुलीणं नेय रूवसंपन्नं ।
वेसा वाणरिसरिसा जत्थ फलं तत्थ संकमइ ॥ ५६६ ॥
अणुरायरसियं आमन्तपओहरं गुणविहूणं ।
धड्ढं महावंवङ्कं वेसाहियं सुरधणु व्व ॥ ५६७ ॥
कवडेण रमन्ति जणं पियं पयम्पन्ति अत्थलोहेण ।
ताण नमो वेसाणं अप्पा वि न वल्लहो जाण ॥ ५६८ ॥
कुललञ्छणं अकित्ती अत्थस्स खओ असीलसंवासो ।
गन्तुं चिय वेसहरं न जुज्जए पण्डियजणस्स ॥ ५६९ ॥
संपत्तियाए कालं गमेसु सुलहाए अप्पमुल्लाए ।
देउलवाडयपत्तं तुट्टणसीलं अइमहग्घं ॥ ५७० ॥
वेसाण कवडसयपू-रियाण सब्भावनेहरहियाणं ।
अत्थरहिओ न रुच्चइ पच्चक्खो कामदेवो वि ॥ ५७१ ॥
अत्थस्स कारणेणं चुम्बन्ति मुहाइ वङ्कविरसाइं ।
अप्पा वि जाण वेसो को ताण परो पिओ होइ ॥ ५७२ ॥
सुपमाणा य सुवुत्ता बहुरूवा तह य कोमला सिसिरे ॥
कन्तो पुलेहि विणा वेसा पडिय व्व संपडइ ॥ ५७३ ॥
कुडिलत्तणं च वङ्क-त्तणं च वङ्कत्तणं असच्चं च ।
अन्नाण हुन्ति दोसा वेसाण पुणो अलङ्कारा ॥ ५७४ ॥

निर्मलपवित्रहारा (०चाधारा) बहुलोभा (० लोहा) पुलकिताङ्गेन ।
खड्गलतिकेव वेश्या कोशेन (प्रत्याकारेण) विना न समुह्यते ॥ ५६४ ॥
घनसंचया सुगुह्या निबद्धलोभा (लोहनिबद्धा) भुजङ्गमरनीया ।
मञ्जूषिकेव वेश्या स्थानमेव लोभवित्तस्य (लोह०) ॥ ५६५ ॥
न गणयति रूपवन्तं न कुलीनं नैव रूपसंपन्नं ।
वेश्या वानरीसदृशा यत्र फलं तत्र संक्रामति ॥ ५६६ ॥
अन्योन्यरागरसितमासन्नपयोधरं गुणविहीनं ।
स्तब्धं स्वभाववक्रं वेश्याहृदयं सुरधनुरिव ॥ ५६७ ॥
कपटेन रमयन्ति जनं प्रियं प्रजल्पन्त्यर्थलोभेन ।
ताभ्यो नमो वेश्याभ्य आत्मापि न वल्लभो यासां ॥ ५६८ ॥
कुललाञ्छनमकीर्तिरर्थस्य क्षयोऽशीलसंवासः ।
गन्तुमेव वेश्यागृहं न युज्यते पण्डितजनस्य ॥ ५६९ ॥
बालया कालं गमय सुलभयाल्पमूल्यया ।
देवकुलवाटकपात्रं त्रुटनशीलमतिमहार्घं ॥ ५७० ॥
वेश्याभ्यः कपटशतपूरिताभ्यः स्वभावस्नेहरहिताभ्यः ।
अर्थरहितो न रुच्यते प्रत्यक्षः कामदेवोऽपि ॥ ५७१ ॥
अर्थस्य कारणेन चुम्बन्ति मुखानि वक्रविरसानि ।
आत्मापि यासां द्वेष्यः कस्तासां परः प्रियो भवति ॥ ५७२ ॥
सुप्रमाणा च सुसूक्षा बहुरूपा तथा च कोमला शिशिरे ।
कुतः पुण्यैर्विना वेश्या पटिकेव संपद्यते ॥ ५७३ ॥
कुटिलत्वं च वक्रत्वं च वञ्चकत्वमसत्यं च ।
अन्येषां भवन्ति दोषा वेश्यानां पुनरलङ्काराः ॥ ५७४ ॥

सरसा निहसणसारा गन्धड्ढा बहुभुयङ्गपरिमलिया।
चन्दणलय व्व वेसा भण कस्स न वल्लहा होइ ॥ ५७५ ॥

मा जाणह मह सुहयं वेसाहियय सममसणुल्लावं।
सेवाललित्तपत्थर–सरिसं पडणेण जाणिहिसि ॥ ५७६ ॥

एक्कं खायइ मडयं अन्नं च कडक्खरक्खियं धरइ।
अन्नस्स देइ दिट्ठी ससाणसिवसारिसा वेसा ॥ ५७७ ॥

गहिऊण सयलगन्थं मोक्खं झायन्ति तग्गयमणाओ।
वेसा मुणिसारिच्छा निच्चं चिय कवलियासत्था ॥ ५७८ ॥

किविणवज्जा।

न हु कस्स वि देन्ति धणं अन्नं देन्तं पि तह निवारन्ति।
अत्था किं किविणत्था सत्थावत्था सुयन्ति व्व ॥ ५७९ ॥

निहणन्ति धणं धरणी–यलम्मि इय जाणिऊण किविणजणा।
पायाले गन्तव्वं ता गच्छउ अग्गठाणं पि ॥ ५८० ॥

करिणो हरिनहरविया–रियस्स दीसन्ति मोत्तिया कुम्भे।
किविणाण नवरि मरणे पयड च्चिय हुन्ति भण्डारा ॥ ५८१ ॥

परिमुसइ करयलेण वि पेच्छइ अच्छीहि तं सया किविणो।
आलिहियभित्तिबाउ–ल्लयं व न हु भुञ्जिउं तरइ ॥ ५८२ ॥

पुच्छिज्जन्ता नियपरि–यणेण पयडन्ति नेय तं अत्थं।
सन्तं पि धणं नत्थित्ति जे भणन्ता महाधीरा ॥ ५८३ ॥

अत्थं धरन्ति वियला न देन्ति पूयन्ति सयलभूयाइं।
पुण्णक्खएण झिज्जइ न संपया चायभोएण ॥ ५८४ ॥

सरसा निघर्षणसारा गन्धाढ्या बहुभुजङ्गपरिमृदिता।
चन्दनलतेव वेश्या भण कस्य न वल्लभा भवति॥५७५॥
मा जानीत मम सुभगं वेश्याहृदयं समन्मनोल्लापं।
शैवाललिप्तप्रस्तरसदृशं पतनेन ज्ञास्यसि॥५७६॥
एकं खादति मृतकमन्यं च कटाक्षरचितं धारयति।
अन्यस्य ददाति दृष्टिं श्मशानशिवासदृशा वेश्या॥५७७॥
गृहीत्वा सकलग्रन्थं मोक्षं ध्यायन्ति तद्गतमनसः।
वेश्या मुनिसदृशा नित्यमेव कवलितहस्ताः (कपालहस्ताः)॥५७८॥

कृपण—पद्धतिः।

न खलु कस्यापि ददति धनमन्यं ददानमपि तथा निवारयन्ति।
अर्थाः किं कृपणस्याः स्वस्थावस्थाः स्वपन्तीव॥५७९॥
निखनन्ति धनं धरणीतले इति ज्ञात्वा कृपणजनाः।
पाताले गन्तव्यं ततो गच्छत्वग्रस्थानमपि॥५८०॥
करिणो हरिनखरविदारितस्य दृश्यन्ते मौक्तिकानि कुम्भे।
कृपणानां केवलं मरणे प्रकटान्येव भवन्ति भाण्डागाराणि॥५८१॥
परिमृशति करतलेनापि पश्यत्यक्षिभ्यां तत्सदा कृपणः।
आलिखितभित्तिपञ्चालिकामिव न खलु भोक्तुं तरति॥५८२॥
पृच्छ्यमाना निजपरिजनेन प्रकटयन्ति नैव तमर्थं।
सदपि धनं नास्तीति ये भणन्ति ते महाघोराः॥५८३॥
अर्थं धरन्ति विकला न ददति पूजयन्ति सकलभूतानि।
पुण्यक्षयेण क्षीयते न सम्पत्त्यागभोगाभ्यां॥५८४॥

देमि न कस्स वि जम्पइ उद्दारजणस्स विविहरयणाइ ।
चाएण विणा वि नरो पुणोवि लच्छीए पम्मुक्को ॥ ५८५ ॥

उड्डवज्जा ।

कुणइ दढं कुद्दालं अइगमणे आउलं व पेल्लेइ ।
विलिहइ दो वि तडीओ आणइ हिययाणियं उड्डो ॥ ५८६ ॥
सिरजाणए निउत्तो उड्डो हत्थेण खणणकुसलेण ।
कुद्दालेण य रहियं कह उड्डो आणए उययं ॥ ५८७ ॥
निहयकुद्दालहत्थ — थमज्झवङ्कलुच्छलन्तजलसोत्तं ।
उड्डो लद्धप्फरिसो भरियं पि न मेल्लए वाविं ॥ ५८८ ॥
कुद्दालघायघणता — डणेण पज्झरइ वसुह न हु चोज्जं ।
सो उड्डो जस्स विट्टं — मणेण वडवा जलं देइ ॥ ५८९ ॥

कण्हवज्जा ।

कुसलं राहे सुहिओ सि कंस कंसो कहिं कहिं राहा ।
इय बालियाए भणिए विलक्खहसिरं हरिं नमह ॥ ५९० ॥
तं नमह जस्स गोट्ठे मयणाणलताविआउ गोवीओ ।
पायउकण्ठग्गहम — ग्गिरीउ रिट्ठं पसंसन्ति ॥ ५९१ ॥
कण्हो जयइ जुवाणो राहा उम्मत्तजोव्वणा जयइ ।
जउणा वङ्कतरङ्गा ते दियहा तेत्तिय च्चेव ॥ ५९० ॥
तिहुयणमिओ वि हरी निवडइ गोवालियाए चलणेसु ।
सच्चं चिय नेहनिर — न्धलेहि दोसा न दीसन्ति ॥ ५९३ ॥

ददामि न कस्यापि निवेदयत्युदारजनस्य विविधरत्नानि ।
त्यागेन विनापि नरः पुनरपि लक्ष्म्या प्रमुक्तः ॥ ५८५ ॥

उड्डु—पद्धतिः ।

क्षिपति दृढं कुद्दालमतिगमन आकुलमिव प्रेरयति ।
विलिखति देशमपि तस्यावानयति हृदयेप्सितं पानीयमुड्डुः ॥ ५८६ ॥
शिरोजानुके नियुक्त उड्डो हस्तेन खननकुशलेन ।
कुद्दालेन च रहितं कथमुड्डु आनयत्युदकं ॥ ५८७ ॥
निर्दयकुद्दालहस्तकमध्यवङ्कलोच्छलज्जलस्रोतसं ।
उड्डो लब्धस्पर्शो मृतामपि न त्यजति वापीं ॥ ५८८ ॥
कुद्दालघातघनताडनेन प्रचरति वसुधा न खल्वाश्चर्यं ।
स उड्डो यस्य दर्शनेन वडवा जलं ददाति ॥ ५८९ ॥

कृष्ण—पद्धतिः ।

कुशलं राधे सुखितोऽसि कंस कंसः क्व क्व राधा ।
इति बलिकया भणिते विलक्षहसनशीलं हरिं नमत ॥ ५९० ॥
तं नमत यस्य गोष्ठे मदनानलतापिता गोप्यः ।
प्रकटकण्ठग्रहमार्गणशीला अरिष्टं प्रशंसन्ति ॥ ५९१ ॥
कृष्णो जयति युवा राधोन्मत्तयौवना जयति ।
यमुना बहुलतरङ्गा ते दिवसास्तादृशा एव ॥ ५९२ ॥
त्रिभुवननमितोऽपि हरिर्निपतति गोपालिकायाः चरणयोः ।
सत्यमेव स्नेहान्धैर्दोषा न दृश्यन्ते । ॥ ५९३ ॥

कण्हो कण्हो निसि च- न्दवज्जिया निविडवेडसा जउणा ।
भमरो होहो जइ लह- सि पुत्ति वयणस्स गन्धेण ॥ ५९४ ॥
केसिविणारणरुहिर- संकुप्पइग्घसणलञ्छणग्घवियं ।
न मुएइ कण्ह जुण्णं पि कञ्चुयं अज्ज वि विसाहा ॥ ५९५ ॥
राहाए कवोलतलु- च्छलन्तजोण्हानिवायधवलङ्गो ।
रइरहसवावडाए धवलो आलिङ्गिओ कण्हो ॥ ५९६ ॥
धवलं धवलच्छीए मउरं मउराउरीए मज्झम्मि ।
तक्कं विक्कन्तीए कण्हो कण्हो त्ति वाहरिओ ॥ ५९७ ॥
सच्चं चेय भुयङ्गो विसाहिया कण्ह तण्हहा होइ ।
सन्ते वि विणयतणए जोए घुम्माविओ तं सि ॥ ५९८ ॥
केसव पुराणपुरिसो सच्चं चिय तं सि जं जणो भणइ ।
जेणं विसाहियाए भमसि सया हत्थलग्गाए ॥ ५९९ ॥
किसिओ सि कीस केसव किं न कओ धन्नसंगहो मूढ ।
कत्तो मणपरिओसो विसाहियं भुञ्जमाणस्स ॥ ६०० ॥
विहडउ मण्डलिबन्धो भज्जउ रासो न मुञ्चए कण्ह ।
नवविसमएहि लद्धो तुह हत्थो मज्झ हत्थेण ॥ ६०१ ॥
कण्हो देवो देवा वि पत्थरा सुयणु निम्मविज्जन्ति ।
अम्हेहि न मउइज्ज- न्ति पत्थरा किं व रूसेण ॥ ६०२ ॥
मउराउज्जे वि हरी न मुयइ गोवालियाण तं पेम्मं ।
खण्डन्ति न सप्पुरिसा पणयपरूढाइं पेम्माइं ॥ ६०३ ॥
सच्चं चिय चवइ जणो अमुणियपरमत्थनन्दगोवालो ।
चणजीवणो सि केसव आभीरो नत्थि संदेहो ॥ ६०४ ॥

कृष्ण: कृष्णो निशा चन्द्रवर्जिता निविडवेतसा यमुना ।
भ्रमरी भव यदि लभसे पुत्रि वदनस्य गन्धेन ॥ ५९४ ॥
केशिविदारणरुधिरार्द्रकूर्परोद्घर्षणलाञ्छनपूर्णां ।
न त्यजति कृष्ण जीर्णमपि कञ्चुकमद्यपि विशाखा ॥ ५९५ ॥
राधया कपोलतलोच्छलज्ज्योत्स्नानिपातधवलाङ्गः ।
रतिरभसव्यापृतया धवल आलिङ्गितः कृष्णः ॥ ५९६ ॥
धवलं धवलाढ्या मधुरं मथुरापुर्या मध्ये ।
तक्रं विक्रीणानया कृष्ण कृष्णेति व्याहृतं ॥ ५९७ ॥
सत्यमेव भुजङ्गी विशाखा कृष्णतृष्णका भवति ।
सत्यपि विनतातनये यया घूर्णापितस्त्वमसि ॥ ५९८ ॥
केशव पुराणपुरुषः सत्यमेव त्वमसि यं जनो भणति ।
येन विशाखया भ्रमसि सदा हस्तलग्नया (*यष्ट्या) ॥ ५९९ ॥
कृशोऽसि किं केशव किं न कृतो धन्यासंग्रहो (धान्य॰) मूढ ।
कुतो मनःपरितोषो गोपीं (विमाधिकं) भुञ्जानस्य ॥ ६०० ॥
विघटतु मण्डलिबन्धो भज्यतां रासो न मुच्यते कृष्ण ।
नवसितशतैस्त्वस्तव हस्तो मम हस्तेन ॥ ६०१ ॥
कृष्णो देवो देवा अपि प्रस्तराः सुतनु निर्मिता भवन्ति ।
अश्रुभिर्न मृदूभवन्ति प्रस्तराः किं वा रुदितेन ॥ ६०० ॥
मथुराराज्येऽपि हरिर्न मुञ्चति गोपालिकानां तत्प्रेम ।।
खण्डयन्ति न सत्पुरुषाः प्रणयप्ररूढानि प्रेमाणि ॥ ६०३ ॥
सत्यमेव वदति जनो ऽज्ञातपरमार्थनन्दगोपालः ।
स्तन्यजीवनोऽसि केशवाभीरो नास्ति संदेहः ॥ ६०४ ॥

संभरसि कण्ह कालि — न्दिमज्जणे मह कडिल्लपङ्कुरणं ।
एण्हिं मङ्करारज्जे आलावणस्स वि संदेहो ॥ ६०५ ॥

रुद्दवज्जा ।

रइकलहकुवियगोरी — चलणाहयनिवडिए जडाजूडे ।
निवडन्तचन्दखण्ड — विलोलहत्थं हरं नमह ॥ ६०६ ॥
परिहासवासछोडण — करकिसलयरुद्धनयणजुयलस्स ।
रुद्दस्स तइयनयणं पव्वइपरिचुम्बियं जयइ ॥ ६०७ ॥
संझासमए परिकुवि — यगोरियामुद्दविहडणं विउलं ।
अद्धुम्मिल्लपलोय — न्तलोयणं तं हरं नमह ॥ ६०८ ॥
चन्दाहयपडिबिम्बा — ए जाए मुक्कट्टहासभीयाए ।
गोरीए माणविहडण — घडन्तदेहं हरं नमह ॥ ६०९ ॥
नमिऊण गोरिवयण — स्स पल्लवं ललियकमलमरभमरं ।
कयरइमयरन्दकलं ललियमुहं तं हरं नमह ॥ ६१० ॥

हियालीवज्जा ।

विवरीयरया लच्छी बम्भं दट्ठूण नाहिकमलत्थं ।
हरिणो दाहिणनयणं रसाउला कीस झम्पेइ ॥ ६११ ॥
ढक्कसि हत्थेण मुहं जं जम्पसि अणिमिसं पलोयन्तो ।
हसिरं च वहसि वयणं तुह नाह न निव्वुया दिट्ठी ॥ ६१२ ॥
जइ सा सहीहि भणिया तुज्झ मुहं पुण्णचन्दसारिच्छं ।
कीस मुद्धमुही करेण गण्डत्थलं पुंसइ ॥ ६१३ ॥

संस्मरसि कृष्ण कालिन्दीमज्जने मम कटीवस्त्रप्रावरणं।
इदानीं मथुराराज्य आलापनस्यापि संदेहः॥ ६०५॥

रुद्र—पद्धतिः।

रतिकलहकुपितगौरीचरणाहतनिपतिते जटाजूटे।
निपतच्चन्द्रोधनविलोलहस्तं हरं नमत॥ ६०६॥
परिहासवासच्छोटनकरकिसलयरुद्धनयनयुगलस्य।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति॥ ६०७॥
सन्ध्यासमये परिकुपितगौरीमुद्राविघटनं विपुलं।
अर्धोन्मीलप्रलोकयल्लोचनं तं हरं नमत॥ ६०८॥
चन्द्राहतप्रतिबिम्बाया जाते मुक्ताट्टहासभीतायाः।
गौर्या मानविघटनघटमानदेहं हरं नमत॥ ६०९॥
नत्वा गौरीवदनस्य पल्लवं लङ्घितकमलसरोभ्रमरं।
कृतरतिमकरन्दकलं ललितमुखं तं हरं नमत॥ ६१०॥

हृदयाली—पद्धतिः।

विपरीतरता लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थं।
हरेर्दक्षिणनयनं रसाकुला किं पिदधाति॥ ६११॥
छादयसि हस्तेन मुखं यच्चान्यस्यनिमिषं प्रलोकयन्।
हसनशीलं च वहसि वदनं तत्र नाथ न निर्वृता दृष्टिः॥ ६१२॥
यदि सा सखीभिर्भणिता तव मुखं पूर्णचन्द्रसदृशं।
ततः किं मुग्धमुखी करेण गण्डस्थलं स्पृशति॥ ६१३॥

अच्छीहि पइं सिहिणे—हि दियवरं गुरुयणं नियम्बेण ।
तिण्हि वि जूरेइ वहू न याणिमो केण कज्जेण ॥ ६१४ ॥

जइ सा पइणा भणिया तिलयं विरएमि अत्तणो तुज्झ ।
ता कीस मुद्धडमुही हसिऊण परम्मुही ठाइ ॥ ६१५ ॥

हियए रोसुग्गिण्णं पायपहारं सिरम्मि पत्थन्तो ।
तह उ त्ति पिओ माणं—सिणीए थोरंसुयं रुण्णं ॥ ६१६ ॥

तं दट्ठूण जुवाणं परियणमज्झम्मि पोढमहिलाए ।
उप्फुल्लदलं कमलं करेण मउलाइयं कीस ॥ ६१७ ॥

हन्तूण वरगइन्दं वाहो एक्केण नवरि बाणेण ।
धुवइ सरं पियइ जलं तं जाणइ केण कज्जेण ॥ ६१८ ।

कुङ्कुमकयङ्गरायं पडिहत्थपओहरी कुरङ्गच्छी ।
सयणम्मि नावगूहइ रमणं भण केण कज्जेण ॥ ६१९ ॥

मालत्तयं पयं ऊ—रुएसु तह कज्जलं च चलणेसु ।
पट्ठीए तिलयमालं वहन्त कह से रयं पत्तो ॥ ६२ ॥

अहिणवपेम्मसमागम—जोव्वणरिद्धीवसन्तमासम्मि ।
पवसन्तस्स वि पइणो भण कस्स पलोइयं सीसं ॥ ६०१ ।

जइ देवरेण भणिया खग्गं घेत्तूण राउले वच्च ।
ता कीस मुद्धडमुही हसिऊण पलोयए सेज्जं । ६०० ॥

जइ सासुयाए भणिया पियवसहिं पुत्ति दीवयं देहि ।
ता कीस मुद्धडमुही हसिऊण पलोयए हिययं ॥ ६२३ ॥

जइ सा सहीहि भणिया तुज्झ पई सुनदेउलमसाणो ।
ता कीस मुद्धडमुही अहिययरं गव्वमुव्वहइ ॥ ६२४ ॥

अक्षिभ्यां पतिं स्तनाभ्यां द्विजवरं गुरुजनं नितम्बेन।
चौर्य्यपि निन्दति वधूर्न जानीमः केन कार्य्येण॥ ६१४॥
यदि सा पत्या भणिता तिलकं विरचयाम्यात्मनस्तव।
ततः किं मुग्धमुखी हसित्वा पराङ्मुखी तिष्ठति॥ ६१५॥
हृदये रोषोद्गीर्णं पादप्रहारं शिरसि प्रार्थयमानः।
तथैवेति प्रियो मनस्विन्या स्थूलाश्रु रुदितं॥ ६१६॥
तं दृष्ट्वा युवानं परिजनमध्ये प्रौढमहिलया।
उत्फुल्लदलं कमलं करेण मुकुलीकृतं कस्मात्॥ ६१७॥
हत्वा वरगजेन्द्रं व्याध एकेन केवलं बाणेन।
धावति शरं पिबति जलं तज्जानीत केन कार्य्येण॥ ६१८॥
कुङ्कुमकृताङ्गरागं पूर्णपयोधरा कुरङ्गाक्षी।
शयने नावगूहति रमणं भण केन कार्य्येण॥ ६१९॥
मालकं पद्मूर्वोस्तया कज्जलं च चरणयोः।
पृष्ठे तिलकमालां वहन्कथं तस्या रतं प्राप्तः॥ ६२०॥
अभिनवप्रेमसमागमयौवनर्द्धिवसन्तमासे।
प्रवसतोऽपि पत्युर्भण कुतः प्रलोकितं शिरः। ६२१॥
यदि देवरेण भणिता खड्गं गृहीत्वा राजकुले व्रज।
ततः किं मुग्धमुखी हसित्वा प्रलोकयति शय्यां॥ ६२२॥
यदि श्वश्रा भणिता प्रियवसतौ पुत्रि दीपकं देहि।
ततः किं मुग्धमुखी हसित्वा प्रलोकयति हृदयं॥ ६२३॥
यदि सा सखीभिर्भणिता तव पतिः शून्यदेवकुलसमानः।
ततः किं मुग्धमुख्यधिकतरं गर्वमुद्वहति॥ ६२४॥

ससयवज्जा ।

ढुण्ढुल्लन्तो इच्छा — सुहेसु वरमहिलियाण हत्थेसु ।
खल्वारहारिससओ व्व पुत्ति दइओ न कुट्टिहिइ ॥ ६२५ ॥
तिलतुसमेत्तेण वि वि— प्पिएण तह होइ गरुयसंतावो ।
सुहय विवज्जइ ससओ चम्मच्छेएण वि वराओ ॥ ६२६ ॥
दइ इन्दधणु इह मे — हगज्जियं इह मिहीण उल्लावो ।
पहिओ हारी ससओ व्व पाउसे कह न भालेइ ॥ ६२७ ॥
जा इच्छा कावि मणे — पियस्स तग्गयमणम्मि पुच्छामो ।
ससय वहिल्लो सि तुमं जीविज्जइ अन्नहा कत्तो ॥ ६२८ ॥
अलिएण व सच्चेण व गेण्हसि नामं पि दड्ढगमणस्स ।
सुहय विवज्जइ ससओ चम्मच्छेएण वि वराओ ॥ ६२९

वसन्तवज्जा ।

वणयतुरयाहिरूढो अलिउलझंकारतूरनिग्घोसो ।
पत्तो वसन्तराओ परहुयवरघुट्ठजयसद्दो ॥ ६३० ॥
परिधूसरा वि सहया — रमञ्जरी वहउ मञ्जरीनामं ।
नीसेसपसूणपर — मुहं कयं जीए भमरउलं ॥ ६३१ ॥
उब्भिज्जइ सहयारो वियसइ कुन्दो य वियसइ असोओ ।
सिसिरपरिणामसुहियं उम्मीलं पङ्कयं सहसा ॥ ६३२ ॥
हन्दारविन्दमन्दिर — मयरन्दाणन्दियालिरिञ्छोली ।
रणझणइ कसणमणिमे — हल व्व मङ्गमासलच्छीए ॥ ६३३ ।

शशक—पद्धतिः ।

परिभ्रमन् रथ्यामुखेषु वरमहिलानां हस्तेषु ।
स्कन्धावारहारिशशक इव पुत्रि दयितो न त्रुट्यति ॥ ६२५ ॥
तिलतुषमात्रेणापि विप्रियेण तथा भवति गुरुसंतापः ।
सुभग विपद्यते शशकस्त्वमच्छेदेनापि वराकः ॥ ६२६ ॥
अत्रेन्द्रधनुरत्र मेघगर्जितमत्र शिखिनामुल्लापः ।
पथिको हारिशशक इव प्रवृषि कथं न पश्यति ॥ ६२७ ॥
येच्छा कापि मनःप्रियस्य तद्गतमनसि पृच्छामः ।
शशक शौण्डोऽसि त्वं जीव्यतेऽन्यथा कुतः ॥ ६२८ ॥
अलीकेन वा सत्येन वा गृह्णासि नामापि दग्धगमनस्य ।
सुभग विपद्यते शशकस्त्वमच्छेदेनापि वराकः ॥ ६२९ ॥

वसन्त—पद्धतिः ।

वनजतुरगाधिरूढोऽलिकुलझंकारतूरनिर्घोषः ।
प्राप्तो वसन्तराजः परभृतवरघुष्टजयशब्दः ॥ ६३० ॥
परिधूसरापि सहकारमञ्जरी वहतु मञ्जरीनाम ।
निःशेषप्रसूनपराङ्मुखं कृतं यया भ्रमरकुलं ॥ ६३१ ॥
उद्गच्छति सहकारो विकसति कुन्दस्य विकसत्यशोकः ।
शिशिरपरिणामसुखितमुन्मीलं पङ्कजं सहसा ॥ ६३२ ॥
विपुलारविन्दमन्दिरमकरन्दानन्दितालिपङ्क्तिः ।
रणझणति कृष्णमणिमेखलेव मधुमासलक्ष्म्याः ॥ ६३३ ॥

संधुक्किज्जइ हियए परिमलयाणन्दियालिमालाहिं ।
उल्लाहि वि दिसिमणिम — ञ्जरीहि लोयस्स मयणग्गी ॥ ६ ३ ४ ॥

गहिऊण चूयमञ्जरि कीरो परिभमइ पत्तलाहत्थो ।
ओसरसु सिसिरनरवर लद्धा पुहवी वसन्तेण ॥ ६ ३ ५ ॥

किं करइ तुरियतुरियं अलिउलघणवम्मलो य सहयारो ।
पहियाण विणासास — ङ्किय व्व लच्छी वसन्तस्स ॥ ६ ३ ६ ॥

लङ्कालयाण पुत्तय वसन्तमासम्मि लद्धपसराणं ।
आवीयलोहियाणं बीहेइ जणो पलासाणं ॥ ६ ३ ७ ॥

एक्को च्चिय दुव्विसहो विरहो मारेइ गयवई भीमो ।
किं पुण गहियसिलीमुह - - समाहवो फग्गुणो पत्तो ॥ ६ ३ ८ ॥

होसइ किल साहारो साहारे अङ्गणम्मि वड्ढन्ते ।
पत्ते वसन्तमासे वसन्तमासाइ सोसेइ ॥ ६ ३ ९ ॥

किङ्करि करि म अजुत्तं जणेण जं बालओ त्ति भणिओ सि ।
धवलत्तं देन्तो क — ण्टयाण साहाण मलिणत्तं ॥ ६ ४ ० ॥

मा रच्च सुहंसणए सोहञ्जणए य दिट्ठमत्तम्मि ।
भज्जिहिसि य णाहमिया मा हसिया सव्वलोएण ॥ ६ ४ १ ॥

गिम्हवज्जा ।

अवरेण तवइ सूरो सूरेण य ताविया तवइ रेणू ।
सूरेणऽवरेण पुणो दोहिं पि ऊ ताविया पुहवी ॥ ६ ४ २ ॥

संधुक्ष्यते हृदये परिमलानन्दितालिमालाभिः ।
आर्द्राभिरपि दिङ्मणिमञ्जरीभिर्लोकस्य मदनाग्निः ॥ ६३४ ॥

गृहीत्वा चूतमञ्जरीं कीरः परिभ्रमति प्रतीहारः ।
अपसर शिशिरनरवर लब्धा पृथिवी वसन्तेन ॥ ६३५ ॥

किं करोति त्वरितत्वरितमलिकुलघनशब्दस्य सहकारः ।
पथिकानां विनाशाशङ्कितेव लक्ष्मीर्वसन्तस्य ॥ ६३६ ॥

शाखालयेभ्यो (लङ्कालयेभ्यः) पुत्रक वसन्तमासे (वसान्त्रमांसे) लब्धप्रसरेभ्यः ।
आपीतलोहितेभ्यो (०रुधिरेभ्यो) बिभेति जनः पलाशेभ्यः (राक्षसेभ्यः) ॥ ६३७ ॥

एक एव दुर्विषहो विरहो (विरथो) मारयति गतपतीः (गजपतीन्) भीमः ।
किं पुनो गृहीतशिलीमुख (बाण) समाधवः फाल्गुनः (अर्जुनः) प्राप्तः ॥ ६३८ ॥

भविष्यति किल साधारः सहकारेऽङ्गणे वर्धमाने ।
प्राप्ते वसन्तमासे वसान्त्रमांसानि शोषयति ॥ ६३९ ॥

किङ्करि कुरु मायुक्तं जनेन यद्दालक इति भणितोऽस्मि ।
धवलत्वं दधानः कण्टकानां शाखानां मलिनत्वं ॥ ६४० ॥

मा रज्य शुभंजनके शोभाञ्जनके च दृष्टमात्रे ।
भङ्गुरस इति साहसिका मा हसिता सर्वलोकेन ॥ ६४१ ॥

ग्रीष्म—पद्धतिः ।

अपरेण (ग्रीष्मेण) तपति सूर्यः सूर्येण च तापिता तपति रेणुः ।
सूर्येणापरेण पुनर् द्वाभ्यामपि खलु तापिता पृथिवी ॥ ६४२ ॥

गिम्हे दवग्गिमसिमइ – लियाइ दीसन्ति विञ्झसिहराइं ।
आससु पउत्थवइए न हुन्ति नवपाउसब्भाइं ॥ ६४७ ॥
डहिऊण निरवसेसं ससावयं सुक्खरुक्खमारूढो ।
किं सेसं ति दवग्गी पुणो वि रण्णं पलोएइ ॥ ६४४ ॥
मूलाहिंतो साहा – ण निग्गमो होइ सयलरुक्खाणं ।
साहाहि मूलबन्धो जेहि कओ ते तरू धन्ना ॥ ६४५ ॥

पाउसवज्जा ।

भग्गो गिम्हप्पसरो मेहा गज्जन्ति लद्धसंमाणा ।
मोरेहि वि उग्घुट्ठं पाउसराया चिरं जयउ ॥ ६४६ ॥
करकायपिङ्गलच्छो कसणङ्गो चडुलविज्जुजीहालो ।
पहिय घरिणीए दिट्ठो मेहो उक्कापिसाओ व्व ॥ ६४७ ॥
गज्जन्ति घणा भग्गा य पन्थया पसरियाउ सरियाओ ।
अज्ज वि उज्जुयसीले पियस्स पन्थं पलोएसि ॥ ६४८ ॥
अणुझिज्झिरीउ आलो – इऊण पहियस्स पहियजायाओ ।
धारामोक्खनिहेणं मेहाण गलन्ति अंसूणि ॥ ६४९ ॥
उच्चं उव्वाविरक – न्धरेण भणियं व पाउसे सिहिणा ।
के के इमे पउत्था मोत्तूण घरेसु घरिणीओ ॥ ६५० ॥
जा नीलजलहरोद्दा – रगज्जिए मरइ नेय तुह जाया ।
ता पहिय तुरियतुरियं वह वह उल्लवइ कलकण्ठी ॥ ६५१ ॥
असुणियपयसंचारा दीसन्ति भयंकरा भुयङ्ग व्व ।
विसविसमा दुल्लङ्घा मेहा महिमण्डले लग्गा ॥ ६५२ ॥

ग्रीष्मे दवाग्निमषीमलिनीकृतानि दृश्यन्ते विन्ध्यशिखराणि ।
आश्वसिहि प्रोषितभर्तृके न भवन्ति नवप्रावृडभ्राणि ॥ ६४३ ॥
दग्ध्वा निरवशेषं सश्वापदं शुष्कवृक्षमारूढः ।
किं शेषमिति दवाग्निः पुनरप्यरण्यं प्रलोकयति ॥ ६४४ ॥
मूलेभ्यः शाखानां निर्गमो भवति सकलवृक्षाणां ।
शाखाभिर्मूलबन्धो यैः कृतस्ते तरवो धन्याः (अग्नये) ॥ ६४५ ॥

प्रावृट्—पद्धतिः ।

भग्नो ग्रीष्मप्रसरो मेघा गर्जन्ति लब्धसन्माना: ।
मयूरैरप्युद्घुष्टं प्रावृड्राजश्चिरं जयतु ॥ ६४६ ॥
कषायपिङ्गलाक्षः कृष्णाङ्गश्चटुलविद्युज्जिह्वः ।
पथिक गृहिण्या दृष्टो मेघ उल्कापिशाच इव ॥ ६४७ ॥
गर्जन्ति घना भग्नाश्च पन्थानः प्रसृताः सरितः ।
अद्याप्यृजुशीले प्रियस्य पन्थानं प्रलोकयसि ॥ ६४८ ॥
अनुचीर्णशीला आलोक्य पथिकस्य पथिकजायाः ।
धारामोचनिभेन मेघानां गलन्त्यश्रूणि ॥ ६४९ ॥
अत्यूर्ध्वीकृतकन्धरेण भणितमिव प्रावृट्काले शिखिना ।
के क इमे प्रोषिता मुक्ता गृहेषु गृहिणीः ॥ ६५० ॥
यावन्नीलजलधरोद्दारगर्जिते म्रियते न तव जाया ।
तावत्पथिक त्वरितत्वरितं वह वहेत्युल्लपति कलकण्ठी ॥ ६५१ ॥
अज्ञातपदसंचारा दृश्यन्ते भयंकरा भुजङ्गा इव ।
(विषविषमा) दुर्लङ्घ्या मेघा महीमण्डले लग्नाः ॥ ६५२ ॥

सरयवज्जा ।

सुणइ व पङ्कं न वह — न्ति निज्झरा बरहिणो न नच्चन्ति ।
तणयायन्ति नईओ अत्थमिए पाउसनरिन्दे ॥ ६५३ ॥
उयह तरुकोटराओ गच्छन्तो पूसयाण रिञ्छोली ।
सरए जरिओ व्व दुमो पित्तं व सलोहियं वमइ ॥ ६५४ ॥

हेमन्तवज्जा ।

जाणिज्जइ न उ पियम — प्पियं पि लोयाण तम्मि हेमन्ते ।
सुयणसमागम वऽग्गो निच्चं निच्चं सुहावेइ । ६५५ ॥

सिसिरवज्जा ।

डज्झन्तु सिसिरदियहा पियमप्पियं जणो वहइ ।
दड्ढवयणस्स व हियए सोयायवणरुक्खओ जाओ ॥ ६५६ ॥
अवधूयचलरुक्खणधू — सराउ दीसन्ति फरुसलुक्खाओ ।
उय सिसिरवायलइया अलक्खणा दीणपुरिस व्व ॥ ६५७ ॥
चोराण कामुयाण य पामरपहियाण कुक्कुडो रडइ ।
रे पलह रमह वाहय — ह वहह तणुइज्जए रयणी ॥ ६५८ ॥

जरावज्जा ।

ता धणरिद्धी ता सु — न्दरत्तणं ता वियड्ढिमा लोए ।
जा तरुणीयणकडुय — त्तणाइ न कुणन्ति पलियाइं ॥ ६५९ ॥
न तहालोयम्मि कउ — क्खियम्मि न कुणइ जम्पियं तह च्चेव ।
जह जह तरुणीयणलो — यणेसु सीसे पडन्ताणं ॥ ६६० ॥

शरत्—पद्धतिः ।

शुष्यतीव पङ्कं न वहन्ति निर्झरा बर्हिणो न नृत्यन्ति ।
तनुकायन्ते नद्यो ऽस्तमिते प्रावृट्कालनरेन्द्रे ॥ ६५३ ॥
पश्यत तरुकोटराद्गच्छन्ती शुकानां पङ्क्तिः ।
शरदि ज्वरित इव द्रुमः पित्तमिव सलोहितं वमति ॥ ६५४ ॥

हेमन्त—पद्धतिः ।

ज्ञायते न तु प्रियमप्रियमपि लोकानां तस्मिन्हेमन्ते ।
सुजनसमागम इवाग्निर्नित्यं नित्यं सुखयति ॥ ६५५ ॥

शिशिर—पद्धतिः ।

दह्यन्तु शिशिरदिवसाः प्रियमप्रियं जनो वहति ।
दशवदनस्येव हृदये सीता० (शीत) तपनचर्यो जातः ॥ ६५६ ॥
अवधूतालक्षणधूसरा दृश्यन्ते परुषरूक्षाः ।
पश्य शिशिरवातपरिहिता अलक्षणानि दीनपुरुषा इव ॥ ६५७ ॥
चौराणां कामुकानां च कर्षकाणां पथिकानां च कुक्कुटो रटति ।
रे पलायत रमध्वं वाहयत (क्षेत्राणि) वहत मार्गं तनूभवति रजनी ॥ ६५८ ॥

जरत्—पद्धतिः ।

तावद्धनर्द्धिस्तावत्सुन्दरत्वं तावद्विदग्धता लोके ।
यावत्तरुणीजनकटुकत्वानि न भवन्ति पलितानि ॥ ६५९ ॥
न तथालोके कटाक्षे न खलु जल्पितं तथैव ।
यथा यथा तरुणीजनलोचनेषु शीर्षं पतत्सु ॥ ६६० ॥

रमियं जहिच्छियाए धूलीधवलम्मि गाममज्झम्मि ।
डिम्भत्तणस्स दियहा य णं कया जरयदियह व्व ॥ ६६१ ॥
संकुइयकम्पिरङ्गो ससङ्किरो दिन्नमयलपयमग्गो ।
पलियाण लज्जमाणो न गणेइ अइत्तए दिन्नं ॥ ६६२ ॥
वम्महभक्खणदिव्वो — सहीए अङ्गं च कुणइ जराओ ।
पेच्छइ निट्ठुरहियओ एण्हिं सेवेइ तं कामो । ६६३ ।
उज्झसु विसयं परिहर — सु दुक्कयं कुणसु नियमणे धम्मं ।
ठाऊण कण्णमूले इट्ठं सिट्ठं व पलिएण ॥ ६६४ ॥
जीयं जलबिन्दुसमं उप्पज्जइ जोव्वणं सह जराए ।
दियहा दियहेहि समा न हुन्ति किं निट्ठुरो लोओ ॥ ६६५ ॥
वरिससयं नराऊ तस्स वि अद्धेण हुन्ति राईओ ।
अद्धस्स य अद्धयरं हरइ जरा बालभावेण ॥ ६६६ ॥
को एत्थ सया सुहिओ कस्स व लच्छी थिराइ पेम्माइं ।
कस्स व न होइ पलियं भण को न हु खण्डिओ विहिणा
॥ ६६७ ॥

महिलावज्जा ।

गहचरियदेवचरियं ताराचरियं चराचरे चरियं ।
जाणन्ति सयलचरियं महिलाचरियं न याणन्ति ॥ ६६८ ॥
बहुकूडकवडभरिया मायाछ्वेण रञ्जए हिययं ।
महिलाए सब्भावं अज्ज वि बहवो न याणन्ति ॥ ६६९ ॥
घेप्पइ मच्छाण पए आयासे पक्खिणो य पयमग्गो ।
एक्कं नवरि न घेप्पइ दुल्लक्खं कामिणीहिययं ॥ ६७० ॥

रमितं यथेप्सितं धूलीधवले ग्राममध्ये ।
डिम्भत्वस्य दिवसा ननु हता जरद्दिवसा इव ॥ ६ ६ १ ॥
संकुचितकम्पनशीलाङ्गः मशङ्कनशीलो दत्तसकलपदमार्गः ।
पलितेभ्यो लज्जमानो न गणयति—दत्तं ॥ ६ ६ २ ॥
मन्मथभञ्जनदिव्यौषध्याङ्कं च करोति जराराजः ।
प्रेक्षध्वं निष्ठुरहृदय इदानीं सेवयति तं कामः ॥ ६ ६ ३ ॥
त्यज विषयं परिहर दुष्कृतं कुरु निजमनसि धर्मं ।
स्थिता कर्णमूल इष्टं कथितमिव पलितेन ॥ ६ ६ ४ ॥
जीवं जलबिन्दुसममुत्पद्यते यौवनं सह जरया ।
दिवसा दिवसैः समा न भवन्ति किं निष्ठुरो लोकः ॥ ६ ६ ५ ॥
वर्षशतं नरायुस्तस्यार्धेन भवन्ति रात्रयः
अर्धस्य चार्धतरं हरति जरा बालभावेन ॥ ६ ६ ६ ॥
कोऽत्र सदा सुखितः कस्य वा लक्ष्मीः (स्थिरा) स्थिराणि प्रेमाणि ।
कस्य वा न भवति पलितं भण को न खलु खण्डितो विधिना ॥ ६ ६ ७ ॥

महिला—पद्धतिः ।

ग्रहचरितं देवचरितं ताराचरितं चराचरे चरितं ।
जानन्ति सकलचरितं महिलाचरितं न जानन्ति । ६ ६ ८ ॥
बहुकूटकपटभरिता मायारूपेण रञ्जयति हृदयं ।
महिलायाः सद्भावमद्यापि बहवो न जानन्ति ॥ ६ ६ ९ ॥
गम्यते सत्यानां पयस्याकाशे पक्षिणश्च पदमार्गः ।
एकं नवरं न गम्यते दुर्लक्ष्यं कामिनीहृदयं ॥ ६ ७ ० ॥

पुव्वकयकम्मवज्जा।

इह लोए च्चिय दीसइ सग्गो नरओ य किं परत्तेण।
धणविलसियाण सग्गो नरओ दालिद्दियजणाणं ॥ ६७१ ॥
विहडन्ति सुया विहड— न्ति बान्धवा विहडइ संचिउ अत्थो।
एक्कं नवरि न विहडइ नरस्स पुव्वक्कयं कम्मं ॥ ६७२ ॥
अवहरइ जं न विहियं जं विहियं तं पुणो न नासेइ।
अइणिउणो नवरि विही सित्थं पि न वड्ढिउं देइ ॥ ६७३ ॥
जं चिय विहिणा लिहियं तं चिय परिणमइ सयललोयस्स।
इय जाणिऊण धीरा विहुरे वि न कायरा हुन्ति ॥ ६७४ ॥
पाविज्जइ जत्थ सुहं पाविज्जइ मरणबन्धणं जत्थ।
तेण तहिं चिय निज्जइ नियकम्मगलत्थिओ जीवो ॥ ६७५ ॥
ता किं भएण किं चि— न्तिएण किं जूरिएण बहुएण।
जइ सो च्चेव वियम्भइ पुव्वकओ पुण्णपरिणामो ॥ ६७६ ॥
को दाऊण समत्थो को वा हरिऊण जस्स जं विहियं।
परिणमइ फलं पुत्तय पुव्वक्कम्माणुसारेण ॥ ६७७ ॥

ठाणवज्जा।

रायङ्गणम्मि परिसं— ठियस्स जह कुञ्जरस्स माहप्पं।
विञ्झसिहरम्मि न तहा ठाणेसु गुणा विसट्टन्ति ॥ ६७८ ॥
अञ्झाकवोलपरिसं— ठियस्स जह चन्दणस्स माहप्पं।
मलयसिहरे वि न तहा ठाणेसु गुणा विसट्टन्ति ॥ ६७९ ॥

पूर्वकृतकर्म — पद्धतिः।

इह लोक एव दृश्यते स्वर्गो नरकश्च किं परत्रेण।
धनविलसितानां स्वर्गो नरको दरिद्रजनानां॥ ६७१॥
विघटन्ते सुता विघटन्ते बान्धवा विघटते संचितोऽर्थः।
एवं केवलं न विघटते नरस्य पूर्वकृतं कर्म॥ ६७२॥
अपहरति यन्न विहितं यद्विहितं तत्पुनर्न नाशयति।
अतिनिपुणः केवलं विधिः सिक्थमपि न वर्धितुं ददाति॥ ६७३॥
यदेव विधिना लिखितं तदेव परिणमति सकललोकस्य।
इति ज्ञात्वा धीरा विधुरेऽपि न कातरा भवन्ति॥ ६७४॥
प्राप्यते यत्र सुखं प्राप्यते मरणबन्धनं यत्र।
तेन तत्रैव नीयते निजकर्मगलहस्तितो जीवः॥ ६७५॥
ततः किं भयेन किं चिन्तितेन किं खिन्नेन बहुना।
यदि स एव विजृम्भते पूर्वकृतः पुण्यपरिणामः॥ ६७६॥
को दातुं समर्थः को वा हर्तुं यस्य यद्विहितं।
परिणमति फलं पुत्रक पूर्वकर्मानुसारेण॥ ६७७॥

स्थान—पद्धतिः।

राजाङ्गणे परिसंस्थितस्य यथा कुञ्जरस्य माहात्म्यं।
विन्ध्यशिखरे न तथा स्थानेषु गुणा विघट्टन्ते॥ ६७८॥
प्रौढयुवतीकपोलसंस्थितस्य यथा चन्दनस्य माहात्म्यं।
मलयशिखरेऽपि न तथा स्थानेषु गुणा विघट्टन्ते॥ ६७९॥

वरतरुणिनयणपरिमं — ठियस्स जइ कज्जलस्स माहप्पं ।
दीवसिहरे वि न तहा　ठाणेसु गुणा विसट्टन्ति ॥ ६८० ॥

केसाण दन्तनहठ — क्कुराण बङ्कयाण वङ्कयणे तह य ।
थणयाण ठाणचुक्का — ण मामि को आयरं कुणइ ॥ ६८१ ॥

ठाणं न मुयइ धीरो　ठक्कुरसंघस्स दुट्ठवग्गस्स
ठन्तं पि देइ जुज्झं　ठाणे ठाणे जसं लहइ ॥ ६८२ ॥

गहियविमुक्का तेयं　जिणन्ति सामाइणो नरिन्दाणं ।
दण्डो तह च्चिय ट्ठिय　आमूलो हणइ टङ्कारो ॥ ६८३ ॥

उवहिवडवाणलाणं　परोप्परुल्हवणसोसणमणाणं ।
असुणियमज्झपजलणा — ण वइयरो जिणइ जियलोए ॥ ६८४ ॥

गुणवज्जा ।

जइ नत्थि गुणा ता किं　कुलेण गुणिणो कुलेण न हु कज्जं ।
कुलमकलङ्कं गुणव — ज्जियाण गरुयं चिय कलङ्कं ॥ ६८५ ॥

गुणहीणा जे पुरिसा　कुलेण गव्वं वहन्ति ते मूढा ।
वंसुप्पन्नो वि धणू　गुणरहिए नत्थि टङ्कारो ॥ ६८६ ॥

जम्मन्तरं न गरुयं　गरुयं पुरिसस्स गुणगणारुहणं ।
मुत्ताहलं हि गरुयं　न हु गरुयं सिप्पिसंपुडयं ॥ ६८७ ॥

खरफरुसं सिप्पिउडं　रयणं तं होइ जं अणग्घेयं ।
जाईए किं व किज्जइ　गुणेहि दोसा फुसिज्जन्ति ॥ ६८८ ॥

जं जाणइ भणइ जणो　गुणाण विहवाण अन्तरं गरुयं ।
लब्भइ गुणेहि विहवो　विहवेहि गुणा न घेप्पन्ति ॥ ६८९ ॥

वरतरुणीनयनपरिसंस्थितस्य कज्जलस्य यथा माहात्म्यं।
दीपशिखरेऽपि न तथा स्थानेषु गुणा विघट्टन्ते ॥ ६८० ॥
केशानां दन्तनखठक्कुराणां बहूनां वधूजने तथा च।
स्तनानां स्थानभ्रष्टानां सखि क आदरं करोति ॥ ६८१ ॥
स्थानं न मुञ्चति धीरः ठक्कुरसंघस्य दुष्टवर्गस्य।
तिष्ठदपि ददाति युद्धं स्थाने स्थाने यशो लभते। ६८२ ॥
गृहीतविमुक्तास्तेजो जयन्ति सामाजिका नरेन्द्राणां।
दण्डस्तथैव स्थित आमूलं हन्ति टङ्कारः ॥ ६८३ ॥
उदधिवडवानलयोः परस्परविध्यापनशोषणमनसोः।
अज्ञातमध्यप्रज्वलनयोर्व्यतिकरो जयति जीवलोके ॥ ६८४ ॥

गुण—पद्धतिः।

यदि न सन्ति गुणास्ततः किं कुलेन गुणिनः कुलेन न खलु कार्यं।
कुलमकलङ्कं गुणवर्जितानां गुरुकमेव कलङ्कं॥ ६८५ ॥
गुणहीना ये पुरुषाः कुलेन गर्वं वहन्ति ते मूढाः।
वंशोत्पन्ने ऽपि धनुषि गुणरहिते नास्ति टङ्कारः॥ ६८६ ॥
जन्मान्तरं न गुरु पुरुषस्य गुणगणारोहणं।
मुक्ताफलं गुरु न खलु गुरु शुक्तिसंपुटकं ॥ ६८७॥
अतिपरुषं शुक्तिपुटं रत्नं तद्भवति यदनर्घेयं।
जात्या किमिव क्रियते गुणैर्दोषाः प्रोञ्छ्यन्ते ॥ ६८८ ॥
यज्जानाति भणति जनो गुणानां विभवानामन्तरं गुरुकं।
लभ्यते गुणैर्विभवो विभवेन गुणा न गृह्यन्ते ॥ ६८९ ॥

ठाणं गुणेहि लब्भइ ता गुणगहणं अवस्स कायव्वं ।
हारो वि नेय पावइ गुणरहिओ तरुणिथणवट्टं ॥ ६९० ॥
पासपरिसंठियस्स वि गुणहीणे किं करेइ गुणवन्तो ।
जायन्धयस्स दीवो हत्थकओ निप्फलो च्चेव ॥ ६९१ ॥
परलोयगयाणं पि हु पच्छत्ताओ न ताण पुरिसाणं ।
जाण गुणुच्छाहेणं जियन्ति वंसे समुप्पन्ना ॥ ६९२ ॥

गुणनिन्दावज्जा ।

मुत्ताहलं व पङ्गणो गुणिणो किं करइ वेहरहियस्स ।
जत्थ न पविसइ सूई तत्थ गुणा बाहिर च्चेय ॥ ६९३ ॥
पियकेलिसङ्कमोसा – रिएण हारेण चिन्तियं एयं ।
अवसररहिया गुणव – न्तया वि दूरे धरिज्जन्ति ॥ ६९४ ॥
ता निग्गुणो च्चिय वरं पङ्गनवलम्भेण जाण परिओसो ।
गुणिणो गुणाणुरूवं फलमलहन्ता किलिस्सन्ति ॥ ६९५ ॥
निग्गुणगुणेहि नियनि – ग्गुणत्तणं देहि अम्ह सङ्कीए ।
कलिकाले किं कीरइ गुणेहि पङ्गणो न घेप्पन्ति ॥ ६९६ ॥
सव्वत्तो वसइ धरा सन्ति नरिन्दा गुणा वि अग्घन्ति ।
ता किं सहन्ति गुणिणो अणायरं अत्थवन्ताणं ॥ ६९७ ॥

गुणसलाहावज्जा ।

जस्स न गेण्हन्ति गुणा सुयणा गोट्ठीसु रणमुहे सुहडा ।
नियजणणिजोव्वणुल्लू – रणेण किं तेण जाएण ॥ ६९८ ॥

स्थानं गुणैर्लभ्यते ततो गुणग्रहणमवश्यं कर्तव्यं ।
हारो ऽपि नैव प्राप्नोति गुणरहितस्तरुणीस्तनपट्टं ॥ ६८० ॥
पार्श्वपरिसंस्थितो ऽपि गुणहीने किं करोति गुणवान् ।
जात्यन्धस्य दीपो हस्तकृतो निष्फल एव ॥ ६८१ ॥
परलोकगतानामपि खलु पश्चात्तापो न तेषां पुरुषाणां ।
येषां गुणोत्साहेन जीवन्ति वंशे समुत्पन्नाः ॥ ६८२ ॥

गुणनिन्दा—पद्धतिः ।

मुक्ताफलं प्रभोर्गुणिनः किं करोति वेधरहितस्य ।
यत्र न प्रविशति सूची तत्र गुणा बहिरेव ॥ ६८३ ॥
प्रियकेलिसंगमावसारितेन हारेण चिन्तितमेतद् ।
अवसररहिता गुणवन्तोऽपि दूरे क्रियन्ते ॥ ६८४ ॥
ततो निर्गुण एव वरं प्रभुनवलम्भेन येषां परितोषः ।
गुणिनो गुणानुरूपं फलमलभमानाः क्लिश्यन्ति ॥ ६८५ ॥
निर्गुण गुणैर्निजनिर्गुणत्वं देह्यस्मभ्यं द्रव्यविनिमयेन ।
कलिकाले किं क्रियते गुणैः प्रभवो न गृह्णन्ते ॥ ६८६ ॥
सर्वत्र वसति धरा सन्ति नरेन्द्रा गुणा अभ्यर्घ्यन्ते ।
ततः किं सहन्ति गुणिनो ऽनादरमर्थवतां ॥ ६८७॥

गुणश्लाघा—पद्धतिः ।

यस्य न गृह्णन्ति गुणान् सुजना गोष्ठीषु रणमुखे सुभटाः ।
निजजननीयौवनोत्पूरणेन किं तेन जातेन ॥ ६८८ ॥

किं तेण जाइएण वि पुरिसे पयपूरणे वि असमत्थे ।
जेण न जसेण भरियं ससि व्व भुवणन्तरं सयलं ॥ ६९९ ॥
देसे गामे नयरे रायपहे तियचउक्कमग्गे वा ।
जस्स न पसरइ कित्ती धिरत्थु किं तेण जाएण ॥ ७०० ॥
किं तेण आइएण व किं वा पसयच्छि तेण व गएण ।
जस्स कए रणरणयं नयरे न घराघरं होइ ॥ ७०१ ॥

पुरुसनिन्दावज्जा ।

उड्ढं वच्चन्ति अहो वयन्ति मूलङ्कुर व्व भुवणम्मि ।
विज्जाहियए कत्तो कुलाहि पुरिसा समुप्पन्ना ॥ ७०२ ॥
नियकम्मेहि वि नीयं उच्चं पुरिसा लहन्ति संठाणं ।
सुरमन्दिरकूवयरा उड्ढमुहा य वच्चन्ति ॥ ७०३ ॥
एक्कम्मि कुले एक्क — म्मि मन्दिरे एक्ककुक्खिसंभूया ।
एक्को नरसयसामी अन्नो एक्कस्स असमत्थो ॥ ७०४ ॥
सज्जणसलाहणिज्जे पयम्मि अप्पा न ठाविओ जेहिं ।
सुसमत्था जे न परो — वयारिणो तेहि वि न किं पि ॥ ७०५ ॥

कमलवज्जा ।

छिद्दकयकण्टयाणं पयडियकोसाण मित्तसमुहाणं ।
मामि गुणवन्तयाणं कह कमले वसउ न हु कमला ॥ ७०६ ॥
अन्नाणलग्गकयप — त्तपरियणे निहयगुरुजडाजाले ।
मित्तालोयणसुहिए कह कमले वसउ न हु कमला ॥ ७०७ ॥

किं तेन जातिमतापि पुरुषेण पदपूरणेऽप्यसमर्थेन।
येन न यशसा भृतं सरिदिव भुवनान्तरं सकलं॥ ९९॥
देशे ग्रामे नगरे राजपथे त्रिकचतुष्कमार्गे वा।
यस्य न प्रसरति कीर्तिर्धिगस्तु किं तेन जातेन॥१००॥
किं तेनागतेनैव किं वा प्रसूतापि तेनैव गतेन।
यस्य कृते रणरणको नगरे न गृहे गृहे भवति॥१०१॥

पुरुषनिन्दा-पद्धति।

ऊर्ध्वं व्रजन्त्यधो व्रजन्ति मूलाङ्कुरा इव भुवने।
विद्याधिके कुतः कुलात्पुरुषाः समुत्पन्नाः॥१०२॥
निजकर्मभिरपि नीचमुच्चं पुरुषा लभन्ते संस्थानं।
सुरमन्दिरकूपतरा ऊर्ध्वाधोमुखाश्च व्रजन्ति॥१०३॥
एकस्मिन्कुल एकस्मिन्मन्दिर एकस्यां कुक्षौ समुद्भूतौ।
एको नरशतस्वाम्यन्य एकस्यामसमर्थः॥१०४॥
सज्जनश्लाघनीये पद आत्मा न स्थापितो यैः।
सुसमर्था ये न परोपकारिणस्तैरपि न किमपि॥१०५॥

कमल-पद्धतिः।

अधःकृतकण्टकानां (दुर्जनानां) प्रकटितकोशानां मित्रसंमुखानां।
सखि गुणवतां कथं कमले वसतु न खलु कमला (श्रीः)॥१०६॥
अन्योन्यलग्नकृतपत्त्रपरिजने (अज्ञानलग्नकृतपात्रपरिजने) निहत-
गुरुजटाजाले।
मित्रालोकनसुखिते कमले कथं वसतु न खलु कमला॥१०७॥

पयडियकोसगुणड्ढे तह य कुलीणे सुपत्तपरिवारे।
एवंविहे वसन्तो कमले कमले कयत्था सि॥७०८॥
जडसंवाहियफरुस – त्तणस्स निक्कवियनियगुणोहस्स।
रे कमल तुज्झ कमला निवसइ रत्ताण पत्ताण॥७०९॥
जइ पलहिगुणा परिकि – ढ्ढकायणे तह नु कमल जइ तुज्झ।
ता इह सयले लोए का उवमा तुह ठविज्जन्ति॥७१०॥

कमलनिन्दावज्जा।

